Digitization by Arya Samaj Charitable Foundation, Chennai

रत्नत्रय ग्रन्थमाला - २७

वैज्ञानिकप्राणायामः

पुल्लेलश्रीरामचन्द्रुडु

राष्ट्रियसंस्कृतसंस्थानम्
नवदिल्ली
१९९६

Digitization by Arya Samaj Charitable Foundation, Chennai.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

रजतजयन्तीग्रन्थमाला - २०

वैज्ञानिकषाणमुखम्

पुल्लेल श्रीरामचन्द्रुडु

राष्ट्रियसंस्कृतसंस्थानम्
नईदिल्ली
१९९६

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशकः
डॉ० कमलाकान्त मिश्रः,
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
४०-ए, राजागार्डन, विशालएन्क्लेव
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला-२०

प्रथमसंस्करणम्—१९९६



वि० सं० २०५२

मूल्यम् : रु० ५०/- रुप्यकाणि

अमर प्रिंटिंग प्रेस
[illegible]ल्ली-११०००९
[illegible] ७२५२३६२

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं समपूरयदिति विज्ञाय समेषां संस्कृतानुरागिणां विदुषाञ्च चेतोऽवश्यं मोमुद्येत।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणसंवर्द्धनाभ्यां सह संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्द्धनशक्तेश्च प्रचारार्थं संस्थानस्य योगदानं सुविदितमेव संस्कृतजगति।

संस्थानस्य रजतजयन्तीमभिलक्ष्य तदङ्गत्वेन राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सङ्ग्रथ्य **रजतजयन्तीग्रन्थमालात्वेन** तत्रभवतां समक्षं प्रस्तूय महदानन्द-मनुभवामः।

तत्रायं **वैज्ञानिकषाण्मुख**नामा ग्रन्थः राष्ट्रपतिसम्मानितैः उस्मानिया-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरैः प्रोफेसर-**पुल्लेल श्रीरामचन्द्रुडुमहाशयैः** प्रणीतः; पाणिनिः, कणादः, कौटिल्यः, आर्यभटः, वराहमिहिरः, भास्कराचार्य इति षण्णां प्राचीनाचार्याणां कृत्स्नं शास्त्रं निष्पीड्य शास्त्रस्य वैज्ञानिकविवेचनं तत्सिद्धान्तानां प्रासङ्गिकताञ्च सप्रमाणमुपस्थापयति। विविधशैक्षणिककार्यक्रमेषु व्यापृतेषु सत्स्वपि अस्मदनुरोधमुररीकृत्य ग्रन्थममुं रचितवद्भ्यः प्रोफेसर-श्रीरामचन्द्रुडुमहोदयेभ्यः संस्थानं हार्दिकीं कृतज्ञतां ज्ञापयति।



Digitization by Arya Samaj Charitable Foundation, Chennai

रजतजयन्तीग्रन्थमालायाः प्रकाशनादिषु कार्येषु कृत पूरिपरिश्रमा अस्मत्सहयोगिनः, डा॰ सवितापाठक-डा॰ रा॰ देवनाथन्-प्रभृतयः साधुवादभाजः। यथासमयं ग्रन्थममुं सम्मुद्र्य विमोचनाय प्रस्तुतवन्तः अमरमुद्रणालयाधिकारिणोऽपि धन्यवादार्हाः।

कमलाकान्तमिश्रः

निदेशकः

राष्ट्रियसंस्कृतसंस्थानम्

दिनाङ्कः २१-८-१९९६

नवदेहली

Digitization by Arya Samaj Charitable Foundation, Chennai

विषय सूची

क्र. सं. विषयः	पृष्ठ संख्या
१. पाणिनिः	१
२. कणादः	२७
३. कौटिल्यः	३९
४. आर्यभटः	६९
५. वराहमिहिरः	७९
६. भास्कराचार्यः	९५
७. परामृष्टेषु ग्रन्थेषु प्रधानानां नामानि	११३

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

पाणिनिः

Digitization by Arya Samaj Charitable Foundation, Chennai



Digitization by Arya Samaj Charitable Foundation, Chennai

पाणिनिः

(क्रिस्तोः पूर्वं सप्तमशताब्दी)

"शब्दस्वरूपं विश्लेषणपूर्वकं सम्यक् परिशील्य धातुप्रत्यययोः भेदं निर्धार्य, प्रत्ययस्यार्थादिकं निर्णीय निर्दुष्टा, सर्वाङ्गपरिपूर्णा च काचन व्याकरणप्रक्रिया तत्प्रथमतया भारतीयैः वैयाकरणैरेव प्रवर्तिता। जगत्यस्मिन् कस्मिन्नपि देशे नैवेदृशी प्रक्रिया प्रवर्तितचरेति निरुपमैवेयम्" इति **माक्डानलनामा** पण्डितः **'भारतस्य प्राचीनेतिहासः'** (India's past) इति ग्रन्थे संस्कृतव्याकरणस्य, पाणिन्युपज्ञस्य वैशिष्ट्यं बहुधा प्रशशंस। प्रकृतिप्रत्ययादिविभागपूर्वकं शब्दस्वरूपस्य निरूपणे नैरन्तर्येण बह्वीः शताब्दीः भारते प्रवृत्तायाः प्रयत्नपरम्परायाः फलभूता इय**मष्टाध्यायी,** पाणिनेः कृतिः।

पाणिनिः क्रिस्तोः पूर्वं सप्तमशताब्द्यां भारतं स्वजन्मना अलञ्चकार। 'पा- णिनिः' इति गोत्रनामधेयमिदम्। "पणिनः पुत्रः पाणिनः;, तद्गोत्रोद्भवश्च पाणिनिः"। 'आहीकः' 'शालङ्किः' 'दाक्षीपुत्रः', 'शालातुरीयः' इत्यपि पाणिनेः नामान्तराणि प्राचीनेषु ग्रन्थेषूपलभ्यन्ते। प्रथमयोर्नाम्नोः विषये सत्यपि विवादे अन्त्यस्य नामद्वयस्य पाणिनिसंबद्धत्वे नास्ति सन्देहः।

'दक्ष' इति कस्यचित् संघस्य नाम। एतत्संघसंबद्धाः पश्चिमोत्तरभारते गान्धारसमीपे आसन्। पाणिनेः माता एतत्संघसंभूता, अत एवास्य 'द्राक्षीपुत्रः' इति नाम। शालातुरग्रामाभिजनत्वाच्च अस्य 'शालातुरीयः' इति प्रसिद्धं नाम। ग्रामोऽयं उत्तरेण काबूल-सिन्धु-नदीसंगमतः नातिदूरे वर्तते। ओहिन्दोः पश्चिमोत्तरे देशे अद्य 'माहुर्' इति नाम्ना प्रसिद्धस्य नातिमहतः पट्टनस्यैव पुरा 'शालातुर' इति नामासीदिति मन्वते **कन्निंगहाम्**-प्रभृतयो विद्वांसः। क्रिस्तोः अनन्तरं सप्तमशताब्द्यां दृष्टशालातु-

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bhandarya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

रग्रामेण **ह्यूयन्सांगेन** एवं व्यलेखि—"ग्रामेऽस्मिन् चतस्रः शताब्दीः निरन्तरं पाणिनीयस्याध्ययनं प्रावर्तत । पाणिनिशिष्याः (प्रशिष्याः) अद्यापि पाणिनिं महता आदरेण स्मरन्ति । पाणिनेः शिलाप्रतिमा काचित् अद्यापि तत्र दृश्यते" इति ।

पाणिनेः यथार्थं जीवनवृत्तं ज्ञातुं न कानिचिदपि प्रमाणानि अद्योपलभ्यन्ते । पाणिनिसंबद्धा काचित् कथा **सोमदेवस्य कथासरित्सागरे, क्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां** च दृश्यते । उभावपीमौ ग्रन्थौ **गुणाढ्य**विरचितायाः बृहत्कथायाः संस्कृतानुवादरूपौ एकादश्यां शताब्द्यां निर्मितौ ।

पाणिनिः कात्यायनादिभिः सब्रह्मचारिभिः साकं आचार्यस्य वर्षस्य समीपे किल विद्याभ्यासमकरोत् । परं तु असौ नितरां मन्दबुद्धिरासीत् । अतः विद्याग्रहणे सर्वेभ्योऽपि विद्यार्थिभ्यः दवीयान् आसीत् । आत्मन इमां मन्दबुद्धिताम् अभिज्ञायासौ हिमाचलं गत्वा तत्र च महत्तपः कृत्वा भगवतः महेश्वरस्य प्रसादेन नूतनां कांचिद् व्याकरणप्रक्रियां प्राप । आविर्भूते चास्मिन् व्याकरणे प्राचीनानि सर्वाण्यपि ऐन्द्रादीनि व्याकरणानि लोके प्रायः विस्मृतानीवासन् । विद्याभ्यासकाले पाणिनिं परिहसद्भिः कात्यायनादिभिरपि पाणिनेः वैशिष्ट्यम् अङ्गीकृतम् ।

मञ्जुश्रीमूलकल्पनाम्नि कस्मिंश्चिद् ग्रन्थे (क्री० श० ४००) काचित् कथा दृश्यते—नन्दः पुष्पपुरस्य राजा आसीत् । स किल सर्वदापि शास्त्रविनोदेन कालं यापयति स्म । वररुचिरिति कश्चिद् बौद्धपण्डितः, पाणिनिश्च किल तस्य सुहृदावास्ताम् ।

राजशेखरस्य काव्यमीमांसातोऽपि (क्री. श. ९००) पाणिनिसंबद्धाः केचिद्विषयाः ज्ञायन्ते । पाटलिपुत्रे किल तत्तच्छास्त्रविदुषां परीक्षा प्रवर्तते स्म । तादृशपरीक्षासु लब्धविजयाः उपवर्षः, वर्षः, पाणिनिः, पिङ्गलः, व्याडिः, वररुचिः, पतञ्जलिः अन्ये च विद्वांसः लोके महतीं कीर्तिमलभन्तः—

अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः
वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ॥

—काव्यमीमांसा, १०.२३

Digitization by Arya Samaj Charitable Foundation, Chennai

श्लोकेऽस्मिन् सर्वेऽपि शास्त्रकाराः तेषां कालक्रममनुरुध्य निर्दिष्टाः । **उपवर्षेण** पूर्वोत्तरमीमांसासूत्राणां व्याख्या विरचिता । **शङ्करभगवत्पादाः** अस्य नाम 'भगवानुपवर्षः' इति सादरं निर्दिशन्ति **ब्रह्मसूत्रभाष्ये** । अस्य भ्राता **वर्ष** एव पाणिनेः उपाध्याय इति श्रूयते (यथा पूर्वमेव निर्दिष्टम्) । **पिङ्गलच्छन्दसः** निर्माता **पिङ्गलः** पाणिनेः भ्राता इति केचिद्वदन्ति । व्याडिः अष्टाध्याय्याः अतीव विस्तृतां नैकव्याकरणसिद्धान्तप्रतिपादिकां व्याख्यां **संग्रहाख्यां** व्यरीरचत् इति ग्रन्थान्तरेभ्यः ज्ञायते । सा च व्याख्या अद्य नोपलभ्यते, भगवता **पतञ्जलिना** अस्मादेत संग्रहात् नैकान् विषयान् संगृह्य **महाभाष्यं** विरचितमिति पण्डितलोकेऽस्ति प्रथा । पतञ्जलिना व्याडिः महाभाष्ये द्वित्रस्थानेषु 'दाक्षायणीयः' इति निर्दिष्टः, अतोऽयं पाणिनेः मातुलो भवेदिति केचिदभिप्रयन्ति । अष्टाध्याय्याः उपबृंहकाणां वार्त्तिकानां रचयितुः कात्यायनस्यैव **वररुचिः** इति नामान्तरम् । क्रिस्तोः पूर्वं द्वितीयशताब्द्यां कृतराज्यस्य पुष्यमित्रस्य समकालिकः पतञ्जलिः अष्टाध्याय्याः व्याख्यारूपं महाभाष्यम् अरचयत् । एतादृशः सर्वेऽपि पाटलिपुत्रे विद्वद्भिः परीक्षिताः, लब्धसम्मानाश्च ।

"पाणिनिः प्राचीनशब्दराशिं स्वकाले लब्धप्रचारान् सकलानपि शब्दान् व्याकृत्य अष्टाध्यायीं निर्ममे । तां च सम्राजे प्रेषयामास । स च तां नितरां प्रशशंस" इति **ह्युयन्सांगः** अलिखत् । न केवलं ग्रन्थं प्रैषयत्, स्वयमेव राजास्थानीं गत्वा **पाणिनिः** तस्य राज्ञः सत्कृतीः लेभे इत्यप्यनेनाभ्यूहितुं शक्यते । मौर्यवंशीया अपि राजानः प्रतिवर्षं पाटलिपुत्रनगरे विद्वत्सभाः आयोज्य तासु प्रसिद्धानां पण्डितानां संमानं कुर्वन्ति स्मेति **मेगस्थनीस**-प्रभृतीनां ग्रीस-देशीयानां लेखादिभ्यः ज्ञायते । पशुगणादिसंक्षेमेण सस्यसमृद्ध्यादिसंपादनेन च संबद्धानां नूतनानां विषयाणाम् आविष्कर्तृन्किल विदुषः ते सर्वजनसमक्षं बहुविधसंमानपात्रतामनैषुः । तादृशेभ्यः किल पण्डितेभ्यः करः नैवागृह्यत । पण्डितपरीक्षकाणाम् एतादृशां परिषदां 'सभा' इति नामासीत् । एवादृश्य एव सभाः महाभाष्ये 'चन्द्रगुप्तसभा' 'पुष्यमित्रसभा' इत्यादिनामभिः निर्दिश्यन्ते । आसु सभासु कृतस्य पण्डितसम्मानस्य 'सन्नयनम्' इति प्रसिद्धिरासीत् । पाणिनेः अष्टाध्यायीं कण्ठस्थीकुर्वाणाः किल दीनाराणां सहस्रेण पुरस्कृताः आसन् इति लिखितं **हयूयन्त्सांगेन** । अनेन च अभ्यूहितुं शक्यते पाणिनिः नैकराजसम्मानादीनां पात्रमासीदिति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पाणिनिः न केवलं महान् वैयाकरणः; स महान् कविरप्यासीत्। तेन **पाताल-विजयापरनाम जाम्बवतीपरिणया**ख्यं काव्यं विरचितमिति श्लोकसंग्रहग्रन्थेभ्यः ज्ञायते। अद्येदं काव्यं नोपलभ्यते, तत्र तत्रोदाहृताः द्वित्राः श्लोका एव श्रूयन्ते। **द्विरूपकोशा**ख्यं ग्रन्थान्तरमपि पाणिनिविरचितं लण्डन्नगरस्थायां **इण्डिया आफी-स्लैब्रेरी** इति संस्थायां किल निक्षिप्तं वर्तते। पाणिनिजीवितसंबद्धाः इतोऽधिकाः केऽपि विषयाः नोपलभ्यन्ते। पञ्चतन्त्रे उदाहृतात् श्लोकात् पाणिनिः सिंहेन व्यापादितः इति ज्ञायते। परं तु श्लोकस्यास्य कियद्वा प्रामाण्यमिति नैव निश्चेतुं शक्यते। यतो ह्यस्मिन् त्रयः तत्तद्दर्शनाचार्याः क्रूरमृगैर्हता इति वर्ण्यते—

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्
अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः॥

प्राचीनव्याकरणानि

पाणिनिव्याकरणस्याविर्भावात् नैकशताब्दीभ्यः पूर्वमेव अनेकानि व्याकरणानि आसन्निति सुनिश्चितमिदम्। पाणिनिना उपयुक्तानि कानिचित् पारिभाषिक-संज्ञापदानि **गोपथब्राह्मणे** दृश्यन्ते—

"ओंकारं पृच्छामः को धातुः? किं प्रातिपदिकम्? किं नामाख्यातम्? किं लिङ्गम्? किं वचनम्? का विभक्तिः? कः प्रत्ययः? कः स्वर उपसर्गो निपातः? किं वै व्याकरणम्? को विकारः ? को विकारी? कति मात्राः? कति वर्णः? कत्यक्षरः? कति पदः? कः संयोगः? किं स्थाननादानुप्रदानानुकरणम्" (गो० ब्रा० १.२४) इति

व्याकरणप्रसिद्धाः विभक्तयः **मैत्रायणीसंहितायाम्**(१.७.३) **ऐतरेयब्राह्मणे** च प्रतिपादिताः। तदेवं व्याकरणसंप्रदायोऽयमतीव प्राचीन उपलक्ष्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः" इत्यादेः **ऋक्तन्त्र**वचनात् व्याकरणस्य ब्रह्मोपज्ञत्वं ज्ञायते। ब्रह्मनिर्मितशास्त्रान्तरवत् तत्प्रथमं ब्रह्मणा रचितेन व्याकरणेनापि अतीव विस्तृतेन भाव्यम्, तदनुसारित्वादेव अन्येषां व्याकरणानां 'अनुशासनम्' 'अनुतन्त्रम्' इत्यादीनि नामानि प्रथितानि।

बृहस्पतिव्याकरणम्—

ब्रह्मणः व्याकरणम् अधीत्य बृहस्पतिः इन्द्रमध्यापयामासेति महाभाष्ये उक्तम्—"एवं हि श्रूयते—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम, बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम" (म० भा० १.१.१)। बृहस्पतिरचितस्य व्याकरणस्य नाम 'शब्दपारायणं' भवेदिति महाभाष्यव्याख्यात्रोः **भर्तृहरि-कैयटयोः**—"रूढिशब्दोऽयं कस्य चिद् ग्रन्थस्य", "शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य" इति वाक्याभ्यां ज्ञायते। बृहस्पतिव्याकरणं "गौः, अश्वः, पुरुषः, हस्ती, शकुनिः" इत्यनया रीत्या विभिन्नविभक्त्यादिभिः परिगणयितुमशक्यानाम् असंख्यानां पदानां पठनस्यावश्यकत्वात् तादृशव्याकरणस्याध्यापने अध्ययने च नैकानि वर्षशतानि, वर्षसहस्राणि वा आवश्यकानीत्युक्ते न काप्यतिशयोक्तिः। एवं च ब्रह्माणमारभ्य बृहस्पतिपर्यन्तं विरचितेषु व्याकरणेषु क्रमेण विविधानां शब्दानां पाठ एव क्रियते स्म, प्रकृतिप्रत्यादिविभागेन कंचन शब्दं निर्दिश्य तदनुसारेण शब्दान्तरबोधनरीतिः नैवासीदिति ज्ञायते। अतः वस्तुतः एतेषां व्याकरणत्व- (प्रकृतिप्रत्ययविभाग एव किल व्याकरणम्) मेव नासीत्। अतः तेषां शब्दपारायणाभिधैव युक्ता।

इन्द्रव्याकरणम्—

शब्दपारायणे क्लेशं ज्ञातवता इन्द्रेण काचिन्नूतनैव रीतिः आविष्कृता। अखण्डं पदं मध्यतो विभज्य तत्र कश्चिद् भागः प्रकृतिः, अन्यश्च भागः प्रत्ययः इति

Digitization by Arya Samaj Charitable Foundation, Chennai

काचन प्रक्रिया अनेन समारब्धा; यतः एंव प्रभृति अन्वर्थस्य व्याकरणस्य प्रारम्भः समजनि। "वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्। इमां नो वाचं व्याकुर्विति...तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्" (तै० स० ६.४.७) इति **तैत्तिरीय संहितागतं** वाक्यम् इदमेव द्रढयति। "ताम् अखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्" इति व्याख्यातमिदं वाक्यं **सायणाचार्येण**।

द्वौ व्याकरणसंप्रदायौ—

व्याकरणशास्त्रे **ऐन्द्रसंप्रदायः, माहेश्वरसंप्रदायश्चेति** संप्रदायद्वयं वर्तते; **कातन्त्रव्याकरणम्** ऐन्द्रसंप्रदायसंबद्धम्, **पाणिनीयं** च माहेश्वरसंप्रदायसंबद्धम् इति अभिप्रयन्त्यभियुक्ताः,

पाणिनेः पूर्वं व्याकरणानि—

अष्टाध्याय्यां पाणिनिना **आपिशालिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनः** इति प्राचीनानां दशानामाचार्याणां नामानि निर्दिष्टानि। **महेश्वरः, बृहस्पतिः, इन्द्रः, वायुः, भरद्वाजः, भागुरिः, पौष्करसादिः, काशकृत्स्नः, रौढिः, चारायणः, माध्यन्दिनिः, वैयाघ्रपदः, शौनकिः, गौतमः, व्याडिः** इति अन्येऽपि वैयाकरणाः पाणिनेः पूर्वमासन्निति प्राचीनग्रन्थेभ्यः अवगम्यते। अद्य उपलभ्यमानेषु प्रातिशाख्येषु अन्येषु च सप्तसु वैदिकव्याकरणेषु एकोनषष्टेः प्राचीनाचार्याणां नामधेयान्युपलभ्यन्ते। तेषु द्विः त्रिर्वा आवृत्तानां नामधेयानामपाकरणेऽपि पाणिनेः पूर्वं चतुरशीतिसंख्याकाः वैयाकरणाः आसन्निति प्रतिपादितं पण्डितैः।

अष्ट व्याकरणानि—

हैमबृहद्वृत्त्यवचूर्णौ—

ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इति अष्ट व्याकरणानि निर्दिष्टानि। ऋग्वेदकल्पद्रुमे—ब्राह्मम्, चान्द्रम्, याम्यम्, रौद्रम्, वायव्यम्, वारुणम्, सौम्यम्, वैष्णवम् इति अष्टानां व्याकरणानां निर्देशः उपलभ्यते। बोपदेवः कविकल्पद्रुमे--

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥

इति अष्टानां शाब्दिकानां नामानि निर्दिशति।

नव व्याकरणानि—

श्रीतत्त्वविवेकाख्ये कस्मिंश्चिद् वैष्णवग्रन्थे—

"ऐन्द्रं चान्द्रं कासकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्॥"

इति नव व्याकरणानि निर्दिष्टानि दृश्यन्ते। "सोऽयं नवव्याकरणार्थवेत्ता" इत्यादीनि वाक्यानि रामायणादिषु उपलभ्यन्ते। काशिकायां प्रयुक्तं 'पञ्चव्याकरणः' इति पदं काशिकाकारः (पञ्चमशताब्दी) पञ्च व्याकरणानि जानाति स्मेति सूचयति। एतेषु प्राचीनव्याकरणेषु कानिचित् (प्रतिशाख्यादीनि) वैदिकभाषाव्याख्यारूपाणि, कातन्त्रव्याकरणादीनि लौकिकभाषामात्रसंबद्धानि, पाणिनीयादीनि पुनः लौकिकवैदिक भाषासंबद्धानि।

पाणिनिना अनिर्दिष्टाः वैयाकरणाः

महेश्वरः—

माहेश्वरं व्याकरणम् अतीव विस्तृतमिति सारस्वतभाष्यगतादस्मात् श्लोकात् ज्ञायते—

समुद्रवद् व्याकरणं महेश्वरे
तदर्धकुम्भोद्धरणं बृहस्पतौ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्भागभागाच्च गतं पुरन्दरे
कुशाग्रबिन्दूत्पतितं हि पाणिनौ ॥ इति ।

पाणिनीयशिक्षाया: अन्ते दृष्टात्—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

इति श्लोकात् ज्ञायते यत् "अ इ उ ण्" इत्यादीनि वर्णसमाम्नायसूत्राणि महेश्वर-प्रोक्तानि इति । न केवलमिमानि सूत्राणि, नैकान् अन्यानपि विषयान् माहेश्वरव्या-करणात् संगृह्य पाणिनिः स्वीयं व्याकरणं निर्ममाय इत्यप्यभ्यूहितुं शक्यते । माहेश्वरव्याकरणामिदम् अद्य नोपलभ्यते ।

बृहस्पतिव्याकणम्—

पूर्वमुदाहृतात्—"बृहस्पतिरिन्द्राय" इत्यादेः भाष्योदाहृतात् वाक्यात्—"तथा च बृहस्पतिः—प्रतिपदमशक्यत्वात्, लक्षणस्याप्यनवस्थानात्, तत्रापि स्खलितदर्शनात्, अनवस्थाप्रसंगाच्च मरणान्तो व्याधिर्व्याकरणमिति औशनसः इति—" इत्यस्मात् वाक्याच्च बृहस्पतिनापि किंचिद् व्याकरणं रचितमिति, तस्य नाम 'शब्दपारायणम्' भवेदिति च अभ्यूहितुं शक्यते । तदेव च ऐन्द्रव्याकरणस्य मूलं भवेत् ।

ऐन्द्रव्याकरणम्—

व्याकरणमिदमद्यत्वे नोपलभ्यते । परन्तु **शाकटायन-** (जैन) व्याकरणे **लङ्का-वतारसूत्रे, हैमबृहद्वृत्त्यवचूर्णौ** च व्याकरणस्यास्य निर्देशः दृश्यते । द्वादशशताब्द्याः प्राक्तनः महाभारतव्याख्याता देवबोधः वदति माहेन्द्रव्याकरणाख्यस्य महासमुद्र-स्याग्रतः पाणिनीयव्याकरणं गोष्पदसदृशम् इति—

यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् ।
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

वायव्यव्याकरणम्—

"वाग्वै पराच्यव्याकृतावदत् ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति, सोऽब्रवीद्वरं वृणै, मह्यं वायवे च सह गृह्यातामिति" (तै० स० ६.४.७) इति **तैत्तिरीयसंहितागतेन** वाक्येन सूच्यते व्याकरणनिर्मितौ वायुः इन्द्राय साहाय्यमकरोदिति। **वायुपुराणगतानि** "शब्दशास्त्रविशारदः" इत्यादीनि वायुविशेषणानि तस्य व्याकरणकर्तृतां सूचयन्ति।

भारद्वाजव्याकरणम्—

"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय" इत्यादेः **ऋक्तन्त्रवाक्यात्** ज्ञायते यत् इन्द्रसम्प्रदायेन संबद्धं भरद्वाजव्याकरणं किंचिदासीदिति। **यजुःप्रातिशाख्ये** "भारद्वाजमाख्यातम्" इत्यवदत् **कात्यायनः**। अनेन चाभ्यूह्यते भरद्वाजव्याकरणे आख्यातसंबन्धिनी अतीव विस्तृता चर्चा आसीदिति।

भागुरिव्याकरणम्—

भागुरेः मतं प्रायः शाब्दिकेषु प्रचुरप्रचारं दृश्यते। सर्वविदित एव किल **वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन** उद्धृतः—

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥ इति श्लोकः

भागुरिविरचिततया **शब्दशक्तिप्रकाशादिषु** उदाहृताः—

'गुपूधूपविच्छिपणिपनेरायः कमेस्तु णिङ्।
ऋतेरियङ् चतुर्लेषु नित्यं स्वार्थे परत्र वा॥

अपादानसंप्रदानकरणाधारकर्मणाम्।
कर्तुश्चान्योन्यसन्देहे परमेकं प्रवर्तते॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यादिकारिकाः सूचयन्ति भागुरेः व्याकरणं श्लोकनिबद्धं, पाणिनिव्याकरणाद् विस्तृततरं चेति।

पौष्करसदिव्याकरणम्—

"चरोद्वितीयाः शरि पौष्करसादेरिति वाच्यम्" इति वार्तिकात् ज्ञायते पौष्करसादिः किंचिद्व्याकरणं निर्मिमायेति।

चारायणव्याकरणम्—

"तथा च चारायणिसूत्रम्—"पुरुकृतेच्छच्छ्योः" इति पुरुशब्दः कृतशब्दश्च लुप्यते, यथासंख्यं छे छ्रे परतः; पुरुच्छदनं पुच्छम्। कृतस्य छदनं विनाशनं कृच्छ्रम्" इति **लौगाक्षिगृह्यसूत्रव्याख्यागतात्** वाक्यात्, "कम्बलचारायणीयाः", "ओदनपाणिनीयाः", "घृतरौढीयाः" इति भाष्यगतेभ्यः उदाहरणेभ्यश्च ज्ञायते चारायणेन किंचिद् व्याकरणं व्यरचि इति।

काशकृत्स्नव्याकरणम्—

"पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलम्, काशकृत्स्नम्" इति **महाभाष्य**गतेभ्यः उदाहरणेभ्यः **बोपदेव-क्षीरस्वाम्यादी**नां रचनाभ्यश्च ज्ञायते काशकृत्स्नेन एकं व्याकरणं निर्मितमिति। कन्नडभाषाव्याख्यासहितः **काशकृत्स्न-शब्दकलाप-धातुपाठ** नामा कश्चिद् धातुपाठोऽप्युपलभ्यते। तस्मिन् व्याख्याने १३४ काशकृत्स्नसूत्राण्यप्युद्धृतानि दृश्यन्ते। पण्डिता एवमभिप्रयन्ति—"व्याकरणमिदं प्राचीनस्य कस्यापि व्याकरणस्य संक्षिप्तं रूपम्। परं तु "काशकृत्स्नं गुरुलाघवम्" इति **काशिका**गतात् उदाहरणात् अभ्यूह्यते इदं पाणिनीयात् विस्तृततरम् इति। काशकृत्स्नः अप्रसिद्धानि पदानि परित्यज्य प्रसिद्धान्येव पदानि व्याकरोत्; अत एव च अस्य पूर्वव्याकरणापेक्षया संक्षिप्तता। एवं पूर्वपूर्वव्याकरणेभ्यः उत्तरोत्तराणि संक्षिप्तान्यभवन्" इति। **काशकृत्स्न**व्याकरणमपि श्लोकबद्धमेवासीत्—यथा "गृहाः पुंसि च भूम्न्येव", "अकर्मकेभ्यो धातुभ्यो भावे कर्मणि यङ्स्मृतः" इत्यादि।

Digitization by Arya Samaj Charitable Foundation, Chennai

शंतनुव्याकरणम्—

शन्तनुनाम्ना आचार्येण किंचिद् व्याकरणं निरमायि। अद्य उपलभ्यमानानि **फिट्सूत्राणि** अनेनैव व्याकरणेन संबद्धानि।

वैयाघ्रपदव्याकरणम्—

व्याकरणस्यास्यास्तित्वं "गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः" इति **काशिका**गतात् वाक्यात् अभ्यूह्यते। "दशकाः वैयाघ्रपदीयाः" इति **काशिका**वाक्यादेव अस्य दशाध्यायसंमितत्वमपि ज्ञायते।

माध्यन्दिनिव्याकरणम्—

काशिकायाम्—

सम्बोधने तूशनसस्त्विरूपं सान्तं तथा नान्तमथाप्यदन्तम्।
माध्यन्दिनिर्वष्टि गुणं विदन्ते नपुंसके व्याघ्रपदां वरिष्ठः॥ इति

"इकः षण्डेऽपि संबुद्धौ गुणो माध्यन्दिनेर्मते" इति **प्रक्रियाकौमुद्यां** च लभ्यं वाक्यद्वयं माध्यन्दिनिव्याकरणस्य सत्तां सूचयति।

रौढिव्याकरणम्—

काशिकायां "आपिशलिपाणिनीयाः," "पाणिनीयरौढीयाः" "रौढीयकाशकृत्स्नाः" इत्युदाहरणेषु निर्दिष्टैः वैयाकरणैः आपिशलि-पाणिनि-काशकृत्स्नैः साहचर्यात् रौढिरपि वैयाकरण एवेति ज्ञायते। महाभाष्येऽपि "घृतरौढीयाः" इत्युदाहरणमुपलभ्यते। तत्र दीयमाने घृते अधिकश्रद्धालवः छात्राः रौढिव्याकरणमध्येतुं प्रवर्तन्ते स्म इति तस्य भावः।

Digitization by Arya Samaj Charitable Foundation, Chennai

शौनकिव्याकरणम्—

जज्झलेन विरचितायां **चरकसंहिताव्याख्यायां**—"कारणशब्दस्तु व्युत्पादितः—करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकिः" इति वाक्यम्, **जयमङ्गलाख्ये** भट्टिकाव्यव्याख्याने अवाप्योः अकारलोपप्रतिपादनप्रसङ्गे "धा-इध्धात्वोस्तनिसह्योश्च बहुलत्वेन शौनकिः" इति वाक्यं च दृश्यते, येनेदमनुमीयते शौनकिना एकं व्याकरणं विरचितमिति ।

गौतमव्याकरणम्—

महाभाष्यकारः **पतञ्जलिः** "आपिशलिपाणिनिव्याडिगौतमीयाः" इत्युदाहरणे आपिशलादिवैयाकरणैः साकं गौतमस्य नाम निर्दिशति । **तैत्तिरीयप्रातिशाख्ये** च—"प्रथमपूर्वो हकारश्चतुर्थं तस्य संस्थानं प्लाक्षिकौण्डिन्यगौतमपौष्करसादीनाम्" इति वाक्यं दृश्यते । अतश्च गौतमेनापि किंचिद् व्याकरणं व्यरचीत्यभ्यूह्यते ।

व्याडिव्याकरणम्—

ऋक्प्रातिशाख्ये, महाभाष्ये, अन्येषु च ग्रन्थेषु व्याडेः नाम सादरं निर्दिश्यते । **पुरुषोत्तमदेवः भाषावृत्तौ** "इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्" इति वाक्ये व्याडेः मतं प्रत्यपादयत् । दाक्षायणापरनामायं व्याडिः दाक्षीपुत्रस्य पाणिनेः मातुलः । पाणिनीयायाः अष्टाध्याय्याः संग्रहाभिधाना काचिदतीव विस्तृता व्याख्या व्याडिना विरचिता, सोऽयं संग्रहः "शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः" इत्यादि वदता पतञ्जलिना बहुधा प्रशंसितः । संग्रहः लक्षग्रन्थपरिमित इति **वाक्यपदीयस्य** व्याख्यात्रा **पुण्यराजेनो**क्तम्—"इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं लक्षग्रन्थपरिमाणं संग्रहाभिधानं निबन्धमासीत्" इति । ग्रन्थेनानेन परिचयः काले तस्मिन् पाण्डितीप्रकर्षस्य चिह्नमिवासीत् । एतद्ग्रन्थाध्यापनं यत्र प्रचलति स्म तासां पाठशालानां किल 'व्याडिशाला' इति नामासीत् । विवाहाभिलाषिणः किल युवानः संग्रहमिममध्यैषत । इदं च **महाभाष्यकाशिका**दिषूपलभ्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

मानेभ्यः 'कुमारीदाक्षाः' इत्याद्युदाहरणेभ्यः ज्ञायते, "कुमार्यादिलाभकामाः दाक्ष्यादि-प्रोक्तानि शास्त्रण्यधीयन्ते, तच्छिष्यतां वा प्रतिपद्यन्ते, त एवं क्षिप्यन्ते" (काशिका ६.२.६९) इति तेषामर्थः। ग्रन्थेऽस्मिन् आहत्य २४००० विषयाः विमृष्टाः इति महाभाष्यव्याख्याने **भर्तृहरिः** कथयति। वाक्यपदीयादिषु भर्तृहर्यादिभिः, प्रतिपादिताः व्याकरणदर्शनसंबद्धाः विषयाः संग्रहादेव संगृहीताः भवेयुः। भर्तृहरेः कालात् पूर्वमेव संग्रहस्य पाठनपठनयोः किंचिद् शैथिल्यम् आसीत् इति वाक्यपदीयद्वितीयकाण्डान्तर्गतश्लोकेभ्यः ज्ञायते—

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान्।
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते॥
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥ इति

व्याडिना कश्चित् परिभाषापाठः, लिङ्गानुशासनं चेति अन्यत् ग्रन्थद्वयमपि रचितमिति ग्रन्थान्तरगतैः निर्देशैः ज्ञायते।

पाणिनिना निर्दिष्टाः आचार्याः

आपिशलिः—

"वा सुप्यापिशलेः" इति सूत्रे पाणिनिना **आपिशलेः** नाम निर्दिश्यते। महाभाष्यादिष्वपि आपिशलेः मतं, तदीयानि सूत्राणि च प्रमाणतया निर्दिष्टानि। "आपिशलिशालाः" इति प्रसिद्धासु पाठशालासु आपिशलेः व्याकरणमध्याप्यते स्म। तेषु तेषु ग्रन्थेषूपलभ्यमानात् "अष्टकाः अपिशलपाणिनीयाः" इत्युदाहरणात् आपिशालिव्याकरणेऽपि अष्टावध्यायाः आसन्नित्यभ्यूह्यते। महाभाष्यगतेन—"आपिशलमधीते आपिशला ब्राह्मणी" इति वाक्येन सूच्यते पतञ्जलेः काले आपिशलव्याकरणस्य प्रचुरः प्रचारः आसीत्, स्त्रियोऽपि तद् व्याकरणमध्यगीषत इति। पाणिनिः स्वव्याकरणरचनायाम् आपिशलव्याकरणम् अनुससारेति प्रतीयते, यतः केषांचित् सूत्राणां निर्मितौ (यथा—"मन्यकर्मण्यनादरे उपमाने विभाषाप्राणिषु" इत्यादिषु) विभाषा-गुण-सार्वधातुक-प्रभृतिषु संज्ञासु, 'टाप्-ठन्-शप्-' प्रत्ययादिषु

Digitization by Arya Samaj Charitable Foundation, Chennai

'भष्'-प्रभृतिषु प्रत्यहारेषु च व्याकरणयोरनयोः साम्यमुपलभ्यते। काशिकाव्याख्यायाः **पदमञ्जर्याः** कर्तुः **हरदत्तस्येमानि** वाक्यानि उपोद्बलयन्तीव पूर्वोक्तमाशयम्—"कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति ? आपिशलेन पूर्वेण व्याकरणेन," "पाणिनिरपि स्वकाले शब्दान् प्रत्यक्षयन् आपिशलादिना पूर्वस्मिन्नपि काले सत्तामनुसन्धत्ते; एवमापिशालिरपि," इति। अनेन च ज्ञायते व्याकरणरचनेयमनादेः कालात् अविच्छिन्नप्रवाहरूपेण प्रवर्त्तते इति आपिशल्यादिवत् पाणिनिरपि प्राक्तनानि व्याकरणान्यधीत्य स्वं व्याकरणम् अरचयदिति च। आपिशालिः स्वीयव्याकरणग्रन्थस्याङ्गतया धातुपाठ-गणपाठ-शिक्षादीरपि रचयामास। अद्योपलभ्यमाना उणादिसूत्राणां **पञ्चपादी** आपिशालिनेव विरचितेत्यभिप्रयन्ति विद्वांसः।

काश्यपः—

"तृषिमृषिकृषेः काश्यपस्य" (पा. सू. २.२.२६) "नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्" (पा० सू० ९.४.६७) इति सूत्रद्वये पाणिनिः काश्यपस्य नाम जग्राह। अतः प्रतीयते काश्यपेनापि किंचिद् व्याकरणं निर्मितमिति।

गार्ग्यः—

गार्ग्यस्य नामापि अष्टाध्याय्यां त्रिः गृहीतम्। एतन्निर्मितं व्याकरणं नैवाद्योपलभ्यते।

गालवः—

अष्टाध्याय्यां चतुर्षु स्थानेषु गालवस्य मतमुदाहृतम्। 'भाषावृत्ति-' नाम्नि ग्रन्थे—"इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्" (१.१.७७) इति लिखन् **पुरुषोत्तमदेवः** न केवलमादेशतया, आगमतयापि यण् भवति; अतश्च 'दध्यत्र' 'मध्वरिः' इत्यादिवत् 'दधियत्र' 'मधुवरिः' इत्यादयोऽपि प्रयोगाः साधव एव इति प्रतिपादयति। अतः "भूवादयो धातवः" (२.३.१) इति वदता पाणिना कृतः

Digitization by Arya Samaj Charitable Foundation, Chennai

'ध्वादयः' इत्यस्य स्थाने 'भूवादयः' इति प्रयोगः, यणः आगमता तस्याप्यभिमतेति सूचयति इत्यभिप्रयन्ति विज्ञाः ।

चाक्रवर्मणः—

अस्य नाम पाणिनिना "ई चाक्रवर्मणस्य" (६२.२३०) इति सूत्रे निर्दिष्टम् ।

भारद्वाजः—

"ऋतो भारद्वाजस्य" (७.२.६३) इति सूत्रे पाणिनिना, **तैत्तिरीयप्रातिशाख्य-मैत्रायणीयप्रातिशाख्य**योश्च निर्दिष्टनामधेयस्य भारद्वाजस्य व्याकरणमद्य नैवोपलभ्यते, भारद्वाजस्य कतिचित् वार्तिकानि महाभाष्ये उदाहृतानि ।

शाकटायनः—

अस्य नाम पाणिनिना त्रिषु सूत्रेषु निर्दिष्टम्, **वाजसनेयप्रातिशाख्य-ऋक्प्रातिशाख्य-निरुक्त-महाभाष्यादिष्वपि** शाकटायनोऽयं महावैयाकरणतया अभ्यर्हितः । महाभाष्ये कुत्रचित् पतञ्जलिः शाकटायनस्य विषयान्तर- व्यासक्तचित्ततामेवं वर्णयति—"अथवा कश्चिद् जाग्रदपि वर्तमानं कालं नोपलभते, तद्यथा वैयाकरणानां शाकटायनो रथमार्ग आसीनः शकटसार्थं यान्तं नोपलेभे" (३.२.२६) इति । सर्वेऽपि वैयाकरणाः शाकटायनस्याधमर्णा एवेति **काशिका**गतेभ्यः "अनुशाकटायनं वैयाकरणाः" "उपशाकटायनं वैयाकरणाः" इत्यादिभ्यः उदाहरणेभ्यः अभ्यूह्यते । अद्यानुपलब्धस्यापि अस्य व्याकरणस्य वेशिष्ट्यं नैकेभ्यः ग्रन्थेभ्यः ज्ञायते । लौकिकवैदिकोभयभाषासंबद्धमिदं व्याकरणम् । सर्वेषां नामवाचकपदानां धातुजन्यत्वमङ्गीकुर्वाणः शाकटायनः, शाकपूण्यादिप्राचीननैरुक्तवत् केषां-चिन्नाम्नां धातुद्वयजन्यत्वमप्यङ्गीकरोति । यथा 'सत्य-' शब्दममुं 'इण्' 'अस्' धातुद्वयजन्यं प्रतिपादयति । शब्दाश्चैतन्मतानुसारेण त्रिविधाः—जातिवाचकाः, गुणवाचकाः, क्रियावाचकाश्चेति । अनेन 'अच्छ''अन्तर' इत्यादयोऽपि उपसर्गत्वेन अङ्गीकृताः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शाकल्यः—

अस्य नाम पाणिनिना चतुर्वारं गृहीतम्। लौकिकवैदिकभाषाद्वयसंबद्धमस्य व्याकरणमपि नोपलभ्यते।

सेनकः—

"गिरेश्च सेनकस्य" (५.४.२१२) इति पाणिनिना गृहीतनामधेयेनानेनापि किंचिद् व्याकरणं व्यरचीति अभ्यूह्यते।

स्फोटायनः—

अस्य नाम पाणिनिना "अवङ् स्फोटायनस्य" (६.२.१२३) इति सूत्रे स्मृतम्। स्फोटवादः तत्प्रथमतया वैयाकरणेनानेनाविष्कृत इति **पदमञ्जरी**कारः अभिप्रैति।

अष्टाध्यायी

एवं वहोः कालात् निरन्तरम् उद्गच्छन्ति नैकानि व्याकरणानि सम्यक् अनुशील्य आत्मनः समये तत्तत्प्रान्तेषु लब्धप्रचारां भाषां च निष्पक्षपातया वैज्ञानिकया दृशा परीक्ष्य **पाणिनिः** अनुत्तमं व्याकरणं सूत्राणां चतुःसाहस्र्याम् उपनिबबन्ध। सूत्राणीमानि अष्टसु अध्यायेषु विभक्तानि। एकैकस्याप्यध्यायस्य चत्वारः पादाः। वैदिकीं लौकिकीं च भाषां सम्यग् विविच्य वैज्ञानिकरीत्या रचितस्य अस्य व्याकरणस्य समुद्गमसमनन्तरमेव प्रायः सर्वाण्यपि व्याकरणान्तराणि प्राचीनानि विस्मृतान्यासन्। पाणिनिः न केवलं स्वकालिकीं भाषां, तदा उपलभ्यमानं सर्वमपि पुरातनं वाङ्मयम्, भौगोलिकान् विषयान्, सामाजिकानाचारव्यवहारादीन्, राज्य-वाणिज्यादिसंबद्धान् विषयांश्च करतलामलकवत् अपश्यदिति अष्टाध्याय्याः परिशीलनेन ज्ञायते इति **वासुदेवशरण अग्रवाल**-प्रभृतिभिः विमर्शकाग्रेसरैः सप्रमाणं निरूपितम् "इण्डिया याज् नोन् टु पाणिनि" (India as kwown to panini) इत्यादिषु ग्रन्थेषु।

पाणिनिना सूत्रेषु प्रयुक्तः एको वर्णोऽपि न व्यर्थो भवेत् इति सादरं वदति भाष्यकारः **पतञ्जलिः**—"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे

Digitization by Arya Samaj Charitable Foundation, Chennai

उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। किं पुनरियता सूत्रेण" (म० भा० २.२.२) इति। "सामर्थ्ययोगान्न हि किंचिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्" (म० भा० ६.२.७७) इति च। एवं **जयादित्यो**ऽपि "उदक्च विपाशः" (४.२.७४) इति सूत्रस्य वृत्तौ "महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य" इति वदन् पाणिनेः सूक्ष्मेक्षिकां नितरां प्रशशंस।

अष्टकम्, शब्दानुशासनम्, वृत्तिसूत्रम्, अष्टिका इत्यादिभिर्नामान्तरैरपि विदितायाः अष्टाध्याय्याः प्रारम्भः पाणिनिना "वृद्धिरादैच्" इति सूत्रेण कृतः, "अथ शब्दानुशासनम्" इति वचनं तु भाष्यकारस्य इति **कैयटा**दयः अभिप्रयन्ति। परं तु प्राचीनानां सूत्रकाराणां रीतिं यदि परिशीलयामः तदा "अथ शब्दानुशासनम्" इत्येतदष्टाध्याय्याः प्रथमं सूत्रं भवेदित्यभ्युपगन्तव्यम् इति वदन् युधिष्ठिरमीमांसकः अत्र—"व्याकरणशास्त्रमारभमाणो भगवान् पाणिनिमुनिः प्रयोजननामनी व्याचिख्यासुः प्रतिजानीते अथ शब्दानुशासनमिति" इति भाषावृत्तिव्याख्यातुः सृष्टिधराचार्यस्य वाक्यं प्रमाणतया उपक्षिपति। 'अ इ उ ण्' इत्याद्ययाः चतुर्दशसूत्र्या अपि पाणिन्युपज्ञतामेव अङ्गीकुर्वन्ति दयानन्दसरस्वत्यादयो विपश्चितः।

सूत्र—शब्दस्य बहूनि निर्वचनानि उपलभ्यन्ते—'सूचनात् सूत्रम्', 'सूचयति सूते, सूत्रयति वा सूत्रम्', 'सूत्रं सूचनकृत्, सूत्र्यते ग्रथ्यते इति वा सूत्रम्; सूचनाद्वा',

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥

इत्यादीनि। यथा सुसूक्ष्मेण सूत्रेण बृहत्प्रमाणानां पुष्पाणां संघातः क्रमेणैकत्र संग्रथ्यते तथैव अतिविस्तृतस्यार्थजातस्य सुसंबद्धया रीत्या एकत्र निबन्धृणां वाक्यानामल्पप्रमाणानां सूत्रमिति नाम्ना व्यावहारः प्रसिद्धिमुपगत इत्यभ्यूहितुं शक्यते।

सूत्राणां प्रधानलक्षणम् अल्पाक्षरत्वं पाणिनिसूत्रेष्वेवोपलभ्यते नान्येषां कृतिषु सूत्रेषु। अस्य चाल्पाक्षरत्वस्य संपादनाय पाणिनिना बहव उपाया अनुसृताः। तेषु प्रथम उपायः प्रत्याहारपद्धतिः। प्रत्ययादीनाम् अन्ते उपलभ्यमानानां हलां, अनुनासिकानाम् अचाम्, अन्येषां च केषांचित् ल-श-कवर्गाक्षरादीनां पाणिनिना 'इत्' संज्ञा

Digitization by Arya Samaj Charitable Foundation, Chennai

कृता। कंचिद्वर्णं केनचिदित्संज्ञकवर्णेन संधाय कल्पितः वर्णसमुदायः आद्यवर्णस्य मध्यगतानां च वर्णानां संज्ञा भवति, यथा—'अ इ उ ण्' सूत्रे स्थितम् 'अ' वर्णम् 'ऐ औच्' इति सूत्रे स्थितेन इत्संज्ञकेन 'च्' इत्यनेन संयोज्य यदा 'अच्' इति शब्दः निर्मीयते तदायं मध्ये स्थितानां वर्णानाम् अकारस्य च संज्ञा भवति। एवमेव 'हल्' 'अण्' इत्यादयः प्रत्याहाराः सिध्यन्ति। 'राम' इत्यादीनां प्रातिपदिकानाम् अन्ते 'सु' प्रभृतीनां प्रत्ययानां एकविंशतिसंख्याकानां योजनेन पञ्चमादिविभक्तिसप्तके त्रिभिः त्रिभिः वचनैः एकविंशतिसंख्याकानि रूपाणि निष्पद्यन्ते। एषु विभक्तिप्रत्ययेषु प्रथमं 'सु' इत्येतं 'सुप्' इति सप्तमविभक्त्याः बहुवचनप्रत्ययस्य अन्ते स्थितेन 'प्' इति इत्संज्ञकवर्णेन सह योजनेन 'सुप्' इति प्रत्याहारः निष्पद्यते। अयं च सर्वेषां विभक्तिप्रत्ययानां संज्ञा भवति। एतादृशानां बहूनां प्रत्याहाराणां विनियोगः पाणिनिना कृतः येनासौ बहून् वर्णान्, प्रत्ययान्, धातुप्रातिपदिकादींश्च अल्पैः द्वित्रैरक्षरैः संग्रहीतुम् अपारयत्।

द्वितीय उपायः 'टि' 'घु' 'नदी' 'निष्ठा' इत्यादीनां संज्ञानामुपयोगः। कस्यचित् शब्दस्य अन्तिमस्याचः तदादेः अन्त्यभागस्य च 'टि' इति संज्ञा। यथा—'राम' इत्यत्र अन्तिमस्य अकारस्य 'राजन्' इत्यत्र 'अन्' इति अन्तिमाजादेः भागस्य च इयं संज्ञा। 'दा' 'धा' प्रभृतीनाम् आकारान्तानां धातूनां 'घु' इति संज्ञा। 'ईकार-ऊकारान्तानां स्त्रीलिङ्गशब्दानां 'नदी' इति संज्ञा। क्त-क्तवत्प्रत्ययोः 'निष्ठा' इति संज्ञा। एवं पाणिनिना अनेकाः संज्ञाः प्रकल्पिताः। अतश्च तत्तत्पदानां प्रयोगं विनैव सूत्रेषु संज्ञानां निर्देशेन तेषां शब्दानां, प्रत्ययादीनां च ग्रहणं भवति।

अनुवृत्तिः तृतीय उपायः। पूर्वसूत्रात् पदानां स्वीकृतिः अनुवृत्तिः। अनेन सूत्रनिर्मितौ महल्लाघवं संपाद्यते। यथा—"टेः" (६.४.१४३) इति सूत्रस्य 'डिति परे भस्य टेः लोपः' इत्यर्थः। "अल्लोपोऽनः" (६.४.१३४) इति सूत्रात् 'लोपः' इति, "भस्य" (६.४.१२९) इत्यधिकार सूत्रात् 'भस्य' इति, "ति विंशतेर्डिति" (६.४.१४३) इति सूत्रात् 'डिति' इति च पदानि सुत्रेऽस्मिन् अनुवर्तन्ते। "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषासूत्रेण 'पूर्वस्य' इति लभ्यते, तदनुसारेणैव च वृत्तौ 'परे' इति प्रयुक्तम्, एवं च सूत्रस्यास्य पूर्वोक्तोऽर्थो लभ्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

सम्मानकार्याणां केषांचित् शब्दानां गणान् पठित्वा तत्सम्बन्धिकार्यस्य विधानं चतुर्थ उपायः। यथा—'अज' 'एडक' इत्यादीनां शब्दानाम् एकं गणं पठित्वा तेषां सर्वेषामपि "अजाद्यतष्टाप्" इति सूत्रेण 'टाप्' विधीयते स्त्रियाम्।

केषांचित् प्रत्ययानां धातूनां चान्ते 'ण्' 'ङ्' 'ञ्' 'प्' 'डु' इत्यादीनित्संज्ञकान् निवेश्य तान् निमित्तीकृत्य विविधकार्यविधानं पञ्चम उपायः। यथा—ञिति प्रत्यये परे वृद्धिः भवति। रमधातोः ञिति 'घञ्' प्रत्यये कृते अकारस्य वृद्ध्या 'राम' इति भवति। ञित् धातुः उभयपदी भवति, यथा 'डुकृञ् करणे' इति धातोः ञित्वात् तस्य उभयपदित्वम्'। तत्रैव 'डु' इत्यस्य इत्त्वात् "ङ्वितः क्त्रिः" इति सूत्रेण क्त्रिप्रत्यये 'कृत्रिमम्' इति रूपं सिध्यति। इत्संज्ञकवर्णानां साहाय्येन उदात्तादिस्वराणां निर्णयोऽपि भवति। अन्यैः मनसाप्यचिन्तनीयान् एतादृशान् उपायानवलम्ब्य तत्रभवान् **पाणिनिः** अतीव लघुरूपाणि सूत्राणि निर्मातुं शशाक। अत एव "अर्धमात्रालाघवं पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति प्रसिद्धिः। वैदिकीं लौकिकीं च भाषां करतलामलकवत् स्वमानसचक्षुषा अध्यक्षीकुर्वता अनेन महावैयाकरणेन अनुसृताः रीतीः परिशीलयतां, आरूपनिष्पत्तेः, आ च स्वरभेदनिरूपणात् तेन निरूढां भाषाव्याकरणपद्धतिं च कलयतां केषां वा मनः आश्चर्यचकितं न भवेत्?

पाणिनिः धातुपाठ-गणपाठ-उणादिसूत्र-लिङ्गानुशासनादीन्यपि रचयित्वा तानि अष्टाध्याय्याः अनुबन्धतया उपनिबबन्ध। धातुपाठगतानां धातूनां अर्थाः पुनः कालान्तरे अन्यैः पण्डितैः निर्दिष्टाः। तैः साकमनेकान् शिष्यान् स्वीयामष्टाध्यायी मध्यापयामास। "उपसेदिवान् कौत्सः पाणिनिम्" इति भाष्यकारवाक्यात् ज्ञायते **कौत्सः** पाणिनेः प्रधानेषु शिष्येष्वन्यतम इति। वररुच्यपरनामा **कात्यायनोपि** पाणिनेः शिष्य आसीदिति केचिदभिप्रयन्ति। पाणिनेः नैके विद्यार्थिनः व्याकरणम् अध्यगीषत। तेषु केचित् 'पूर्वपाणिनीयाः' इति अन्ये च 'अपरपाणिनीया' इति प्रसिद्धिमलभन्त इति "आचार्योपसर्जनश्चान्ते वासिनि" (६.२.१०४) इति सूत्रगताया वृत्तिकारोक्तेः ज्ञायते। एवम् "उभयथाह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः—केचित् 'आकडारादेका संज्ञा' इति, केचित् 'प्राक्कडारात्परं कार्यम्' इति" इति भाष्यकारवचनमपि सूचयति पाणिनिना अनेके शिष्याः नैकवारम् अष्टाध्यायीम् अध्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

पिताः, अध्यापनसमये पाणिनिनैव केषुचित् सूत्रेषु विभिन्नाः पाठाः प्रवर्तिता इति। अष्टाध्याय्यां पाठभेदाः विरलविरला एवोपलभ्यन्ते। तेषु केचिद् भेदाः वृत्तिकारादि-कृताः, अन्ये च लेखकादिकृता इति अभ्यूहितुं शक्यते। एतादृशैः भेदैः अष्टाध्याय्याः प्राच्यपाठः, उदीच्यपाठः, दाक्षिणात्यपाठश्चेति त्रयः पाठाः सन्तीति मन्यन्ते पण्डिताः। अयं भेदः धातुपाठ-गणपाठ-उणादिपाठेष्वप्युपलभ्यते। **काशिकाकारा**द्यनुसृतः पाठः प्राच्यः, **क्षीरस्वाम्या**दिभिः काश्मीरदेशीयैः अनुसृतः उदीच्यः। **कात्यायनेन** वार्त्तिकैः समुपबृंहितः पाठः दाक्षिणात्यः इति अभ्यूह्यते। प्राच्यपाठस्य वृद्धपाठ इति अत्यल्पपरस्परभेदयोः उदीच्यदाक्षिणात्यपाठयोः लघुपाठ इति च किल नामनी पुरा प्रसिद्धे आस्ताम्।

वेदानां संहितापाठेषु पदाधिकर्षापकर्षयोः निवारणार्थं काचित् रीतिः अनुसृता दृश्यते। अनुवाके एकस्मिन् कति वा पदानि सन्ति इति स्मृतिपथे स्थापयितुं ५० तमम्, १०० तमम्, १५० तमम् इत्यादिविधया पञ्चाशत्तमानि पदानि सर्वाण्यपि पठित्वा अन्ते शिष्टानां (पञ्चाशतः न्यूनानां) पदानां संख्या निर्दिश्यते एकस्मिन् वाक्ये। अध्येतृभिः तान्यपि वाक्यानि कण्ठस्थीक्रियन्ते। यथा 'नमकम्' इति नाम्ना प्रसिद्धे **कृष्णयजुर्वेदीय**चतुर्थकाण्डपञ्चमप्रश्ने आहत्य २२२ पदानि वर्तन्ते। अतः तस्य प्रश्नस्यान्ते "हस्ते दिक्ष्विषव उभाभ्यां द्वाविंशतिश्च" इति वाक्यं दृश्यते। 'हस्ते' इति ५० तमं पदम्, 'दिक्षु' इति १०० तमं पदम्, 'इषवः' इति १५० तमं पदम्, 'उभाभ्याम्' इति २०० तमं पदम्, अन्ते च २२ पदानि सन्तीति अनेन ज्ञायते। अतः पुस्तकसाहाय्यं विना वेदपारायणं कुर्वन्तः अङ्गुलीनां पर्वसु पदानि गणयन्तः वेदपण्डिताः तत्तत्पदानां संख्या वाक्यसूचितया रीत्या यदा उपलभ्यते तदा पारायणे दोषो नास्ति इति, यदा संख्यायाः भङ्गः भवति तदा पारायणे कुत्रापि पददोषः संजात इति ज्ञातुं शक्नुवन्ति।

एतामेव रीतिमनुसृत्य अष्टाध्याय्याः पादानाम् अन्तेषु तत्तत्पादगतानां सूत्राणां संख्यां बोधयन्ति वाक्यानि निवेशितानि। प्रथमाध्यायस्य प्रथमे पादे ७५ सूत्राणि सन्ति। प्रथमं सूत्रं "वृद्धिरादैच्" इति। २१ तमं सूत्रम्—"आद्यन्तवदेकस्मिन्" इति। ४१तमं सूत्रम् "अव्ययीभावश्च" इति, ६१ तमं सूत्रं "प्रत्ययस्य लुक्श्लुलुपः"

Digitization by Arya Samaj Charitable Foundation, Chennai

इति । ततश्च पञ्चदश सूत्राणि वर्तन्ते । एतेषां सूत्राणां प्रथमपदानि गृहीत्वा "वृद्धिराद्यन्तवदव्ययीभावः प्रत्ययस्य लुक्पञ्चदश" इति वाक्यं निर्माय पादस्यान्ते निहितम् । सूत्रैः सह इदं वाक्यमपि कण्ठस्थीकृत्य अष्टाध्याय्याः पारायणं सूत्रगणनपूर्वकं कुर्वन्तः विद्यार्थिनः सद्य एव जानीयुः किं किंचित्सूत्रं विस्मृतम् अथवा सम्यगेव पारायणं कृतम् इति । एतादृशैः नियमैः सुदृढं नियमिता अष्टाध्यायी अद्यावधि सुरक्षिता वर्तते ।

पुरातनव्याकरणेषु प्रसिद्धान् कांश्चित् विषयान् गृहीत्वा पाणिनिः स्वीये व्याकरणे उपयुयोज । परन्तु तेषां प्रसिद्धत्वात् लक्षणादिकं न विशदीचकार । प्राक्तनैः वैयाकरणैः भूत-वर्तमान-भविष्यत्कालानां स्वरूपं स्पष्टतया विशदीकृतम् । परन्तु पाणिनिः तेषां स्वरूपाणि अष्टाध्याय्यां कुत्रापि नालक्षयत् । "पाणिनोपज्ञमकालं व्याकरणम्" "पाणिन्युपज्ञमकालं व्याकरणम्" इत्यादीनि **चान्द्रव्याकरणादि**गतानि वाक्यानि इदमेव सूचयन्ति । एवं सर्वनामादिसंज्ञा अपि पाणिनिना प्राक्तनेभ्य एव गृहीताः । कानिचित् प्रसिद्धानि सूत्राण्यपि किंचित् विपरिणामेन जग्राह पाणिनिः पूर्वेभ्यः । अष्टाध्यायीगतानि श्लोकच्छायावन्ति सूत्राणि, आङादीन् प्राक्तनान् प्रत्ययान् तादृशीः संज्ञाश्च गृहीत्वा उपनिबद्धानि सूत्राणि च पुरातनव्याकरणगतान्येवेति अभिप्रयन्ति विद्वांसः । यथा "पक्षिमत्स्य मृगान् हन्ति परिपन्थं च गच्छति", "तदस्मै दीयते युक्तं श्राणामांसौदनाट्टिटक्," "नोदात्तस्वरितोदयम्", "वृद्धिरादैजदेङ्गुणः", "इग्यणः संप्रसारणम्," "तङानावात्मनेपदम्", "कृत्तद्धितसमासाश्च" इत्यादिषु श्लोकच्छाया दृश्यते । "आङि चापः" "औङ आपः" इत्यादिषु "आङ्" "औङ्" इत्यादीनां प्राचीनव्याकरणगतप्रत्ययानाम्, "उभययर्क्षु" इति सूत्रे वार्थकस्य 'उभयथा' इति शब्दस्य "गोतो णित्" इति सूत्रे ओकारान्तानां प्रचीनवैयाकरणैः गृहीताया 'गो' इति संज्ञायाश्च स्वीकृतिः कृता पाणिनिना । एवं 'अन्यतरस्याम्' इत्यादिसंज्ञाः, समासानां तत्पुरुष-बहुव्रीहिद्विग्वादिसंज्ञाश्च पुरातनव्याकरणेभ्य एव गृहीताः । पाणिनिः **आपिशलिकृतं धातुपाठमनुसृत्य** "श्नसोरल्लोपः" (६.१.११) इति सूत्रे असधातोः निर्देशं 'स्' इति अकरोत् । अत एवाह **न्यासकारः**—"सकारमात्रमस्तिधातुमापिशालिराचार्यः प्रतिजानीते, तथाहि न तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

पाणिनेरिव 'अस भुवि' इति गणपाठः, किं तर्हि 'स भुविः'। इति स पठति (१.३.२२)" इति। पूर्वव्याकरणेषु प्रायः कार्यी प्रथमया निर्दिश्यते स्म। अत एव **कैयटः**—"पूर्वव्याकरणे प्रथमया कार्यी निर्दिश्यते" (१.१.१६३) इति, "पूर्वाचार्याः कार्यभाजः षष्ठ्या न निरदिक्षन्" (८.४.७) इति च अवदत्। पाणिनिः "अल्लोपोऽनः" "तिविंशतेर्डिति" इत्यादि सूत्रेषु एतामेव रीतिमनुससार। एतादृशेषु पाणिनिः प्राचीनान् वैयाकरणान् अनुचकारेति मन्यन्ते पण्डिताः।

पाणिनीयं व्याकरणं पुरातनव्याकरणापेक्षया संक्षिप्तरूपम्। यतः पाणिनिः तेषु व्याकरणेषु प्रसिद्धान् विषयान् विना लक्षणादिविवरणं यथातथं जग्राह, केषांचित् पदानां निष्पत्तिं नैवादर्शयत्। यथा—'क्षिणोति', 'ऋणोति', 'तृणोति' इत्यादिषु इगुपधागुणनिषेधसूत्रं पाणिनीये नोपलभ्यते। अत एवात्र प्रमाणतया आपिशलीयं सूत्रं प्रादर्शि **माधवीयायां धातुवृत्तौ**। "नैकमुदाहरणं योगारम्भं प्रयोजयति" (७.१.९६) इति महाभाष्यवाक्यं सूचयति यत् द्वित्रोदाहरणसाधुत्वं साधयितुं पाणिनिना सूत्रनिर्माणं पृथक् नैवाकारीति।

वर्णोच्चारणादिसंबद्धनियमप्रतिपादकः सूत्रात्मकः शिक्षाग्रन्थोऽपि पाणिनिना विरचितः। लुप्तप्रायोऽयं ग्रन्थः **दयानन्दसरस्वत्यादिभिः** प्राचीनेभ्यो ग्रन्थेभ्यः समुद्धृतः। आपिशलीयवदयमपि अष्टप्रकरणात्मकः। एषां सूत्राणाम् आपिशलिसूत्रैः बहुधा साम्यं दृश्यते। लघुपाठः गुरुपाठश्चेति पाठद्वयं किलास्य वर्तते। **पाणिनिशिक्षा** इति नाम्ना प्रसिद्धा श्लोकरूपा शिक्षा **पिङ्गलेन** विरचितेति "ज्येष्ठ भ्रातृभिर्विहिते व्याकरणेऽनुजस्तत्रभवान् पिङ्गलाचार्यः तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते" इति **शिक्षाप्रकाशटीका**कृतः वचनात् ज्ञायते।

तदेवं वैदिकीं लौकिकीं च भाषां सम्यक् अनुशील्य, प्राक्तनव्याकरणग्रन्थगतान् सर्वानपि विषयान् आकलय्य अतिविस्तृतामेतां संस्कृतभाषां संक्षिप्तेऽस्मिन् व्याकरणे, स्वरप्रक्रियादीन् सुसूक्ष्मानपि विषयान्, अनुज्झित्वा, निबद्धवान् पाणिनिः केवलं पाणिनिनैव उपमातुं शक्यते इति नेयमतिशयोक्तिः। व्याकरणमिदम् अधीत्य सर्वेऽपि पाश्चात्त्यवैयाकरणाः आश्चर्यभरितमानसाः अभवन्। एतद्व्याकृतिसाहाय्येनैव तैः तुलनात्मकभाषाशास्त्रमिति स्वतन्त्रं शास्त्रमेकं निर्मितम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

"यदा संस्कृतभाषा पाश्चात्यविदुषां दृष्टिगोचरतामगमत् तदैव भाषाशास्त्रम् आविर्बभूव" इति **A.V.W. जाक्सन्**पण्डितः **फैलाल्जी** इति ग्रन्थे अवदत्।

लियोनाल्ड ब्लूम् फील्ड-नामा पण्डितः पाणिनीयव्याकरणस्य वैशिष्ट्यं, पाणिनेः अनितरसाधारणीं प्रतिभां च स्तुवन् **लांग्वेज्** इति ग्रन्थे एवम् अवदत्—"यद्व्यमेतत् पाणिनीयं व्याकरणमद्य अस्मिन् रूपे उपलक्षयामः ततः अभ्यूहितुं शक्यते यदस्याविर्भावात् पूर्वं भारतदेशे नैकपुरुषान्तरेषु व्याकरणसंबद्धः निरन्तरो महान् प्रयत्नः प्रावर्ततेति। क्रिस्तोः पूर्वं ३५०-२५० वर्षमध्ये आविर्भूतमिदं व्याकरणं (पाणिनिः क्रिस्तोः पूर्वं सप्तमशताब्द्यामासीत् इतिं भारतीयानां विदुषां निर्णयः) लोकोत्तराया मानवप्रतिभायाः अतिमहत् स्मृतिचिन्हम्। अतिसूक्ष्ममप्यंशमपरित्यज्य व्याकरणेऽस्मिन् पदसंहिताकृताः विकाराः, पदानां व्युत्पत्तिः, पदानां निर्मितिः, संस्कृतभाषासंबद्धा वाक्यनिर्माणरीतिश्च सुस्पष्टतयो वर्णिताः। जगतीतलेऽस्मिन् एतदवधि न कापि भाषा निर्दुष्टया रीत्या एवं व्याकृता" इति।

अहो महती तत्र भवतः पाणिनेः प्रतिभा!

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

कणादः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

कणादः

(क्रिस्तोः पूर्वं षष्ठशताब्दी)

कश्यपगोत्रीयः **कणादः** उलूकस्य पुत्रः। अत एवास्य 'काश्यपः' 'औलूक्यः' इति नामनी अपि प्रसिद्धे। अयम् अलहाबाद-मण्डल-(जिला) गते पभोसानाम्नि (अद्यतन) प्रभास-ग्रामे अवसत्। **सोमशर्मणः** शिष्यः। अयं कणादः **न्यायदर्शन**-प्रवर्तकस्य **गौतमस्य** सब्रह्मचारी इति **वायुपुराणे** उक्तम्। "कणाद इति तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता" इति **न्यायकन्दलीकारः** अस्य 'कणाद' नामधेयहेतुं न्यगदत्। अणुसिद्धान्तस्य प्रवर्तनेनासौ 'कणादं' आसीदिति केचिद्वदन्ति। अयं क्रिस्तोः पूर्वं षष्ठशताब्द्याम् आसीत्। अनेन ईश्वरानुगृहीतेन वैशेषिकशास्त्रं निरमायीति वैशेषिकसूत्रभाष्यकृता **प्रशस्तपादेन** न्यगदि—

योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः॥ इति

प्रसन्नेन महेश्वरेणास्मै उलूकरूपेणागत्य शास्त्रमुपदिष्टमिति च काचित्किवदन्ती।

कणादः वैशेषिकदर्शनं सप्तत्युत्तरशतत्रयेण सूत्राणां निबबन्ध। दश अध्यायाः, प्रत्यध्यायं च द्वे द्वे आह्निके स्तः। ग्रन्थस्य प्रारम्भः "अथातो धर्मं व्याख्यास्यामः" (१.१.१) इति सूत्रेण कृतः। "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति द्वितीयसूत्रेण धर्मस्य लक्षणं प्रत्यपादि। धर्मबोधनेनैव प्रामाण्यं वेदस्य इति प्रतिपादयति—"तद्वचनादाम्नायस्य प्रामाण्यम्" इति तृतीयं सूत्रम्। एवं धर्मप्रतिपादनपरत्वेनास्य शास्त्रस्य प्रारम्भात् शास्त्रमिदं मीमांसाशास्त्रेण संबद्धम्, अथवा

Digitization by Arya Samaj Charitable Foundation, Chennai

शास्त्रयोरनयोरेकतन्त्रत्वमेव इत्यभिप्रयन्ति केचित्। परन्तु कणादेन परस्तात् प्रतिपादितानां विषयाणां परिशीलने ऊहोऽयं सत्यदूर एवेति प्रतिभाति। वेदेभ्यः धर्मस्वरूपं ज्ञात्वा धर्मानुष्ठानेन षण्णां पदार्थानां यथार्थतो ज्ञानम् ततश्च तत्त्वज्ञानम्, ततो मोक्ष इति चतुर्थसूत्रे प्रतिपादितं कणादेन—"धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" (१.१.४) इति। एवं कणादेन कृता धर्मचिन्ता सूत्रत्रयपरिमितैव दृश्यते। षष्ठाध्याये प्रवृत्ता धर्माधर्मचिन्ता आनुषङ्गिक्येव। दर्शनानि सर्वाणि मोक्षोपायभूततत्त्वदर्शन एव प्रवर्तन्ते। अतः कणादः शास्त्रप्रारम्भ एव तदसूसुचत्। **गौतमन्यायसूत्रा**दिष्वपि इयमेव रीतिर्दृश्यते। अतः वैशेषिकदर्शनस्य मीमांसादर्शनेन न कोऽपि संबन्धः।

कणादेन प्रत्यक्षम्, अनुमानमिति प्रमाणद्वयमेवाङ्गीक्रियते। शब्दोपमानयोः अनुमान एवान्तर्भाव इति मनुते कणादः।

प्रायः सर्वेऽपि दार्शनिकाः, येन केनापि वा देशेन कालेन संबद्धाः, जगतः स्वरूपं बोद्धुं निरूपयितुं च प्रवर्तन्ते। सर्वानपि पदार्थान् प्रातिस्विकरूपेण ज्ञातुं न कोऽपि शक्नुयात् ऋते सर्वज्ञात् परमेश्वरात्। अतः जगति दृश्यमानान् पदार्थान् कतिभिश्चिद्विधाभिः स्थूलतया विभज्य तेषां स्वरूपं ज्ञातुं यत्नं कुर्वन्ति दार्शनिकाः, तादृशो यत्नः कणादेनापि वैशेषिकदर्शने कृतः।

जगत्यस्मिन् उपलभ्यमानानां सर्वेषां वस्तूनां स्थूलतया द्विधा विभागः कर्तुं शक्यते अभावरूपाणि भावरूपाणि चेति। सर्वमपि वस्तु येन केनचित् पदेन बोध्यते। अतः वस्तूनां पदार्थ इति नाम। कणादः अभावं नैव निरदिक्षत्। अतः तेन अभावः पदार्थतया अङ्गीकृतो वा नवेति सन्दिहते शास्त्रकृतः। प्रथमाध्यायप्रथमपादचतुर्थसूत्रे कणादः द्रव्यगुणकर्मसामान्यविशेषसमवायरूपान् षट् पदार्थान् उद्दिदेश। कणादेन कृतस्यास्य पदार्थविभागस्य **डा० क्रिस्टोक् सिग्वर्ट** इत्यनेन विदुषा कृतस्य विभागस्य च मध्ये महत्साम्यं वर्तते। यादृच्छिकमपीदं मतंसाम्यं विस्मयजनकमिति मन्यन्ते विद्वांसः। कणादकृतः विभाग एव बहोः कालात् पूर्वं यथा कथंचित् विदेशेष्वपि लब्धप्रचारमासीदिति अभ्यूहितुं शक्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

129

BVBSSMV

द्रव्यम्—"क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्" (१.१.१५) इति द्रव्यं लक्षयित्वा कणादेन पृथिवी, जलम्, अग्निः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनश्चेति नव विधानि द्रव्याणि प्रतिपादितानि।

गुणाः—रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणः, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, गुरुत्वम्, द्रव्यत्वम्, स्नेहः, संस्कारः, धर्मः, अधर्मः, शब्दश्चेति चतुर्विंशतिविधा गुणाः।

कर्म—केवलं द्रव्ये एव समवायसंबन्धेन संबद्धं वर्तते कर्म। गुणरहितं, स्वतन्त्रतया संयोगविभागयोः कारणभूतम्। तच्च उत्क्षेपणम्, अवक्षेपणम्, आकुञ्चनम्, प्रसारणं, गमनं चेति पञ्चविधम्। कर्म मूर्तैरेव पदार्थैः संवध्यते न पुनः अमूर्तपदार्थैः कालदिगाकाशात्मभिः।

सामान्यम्—सामान्यं बुद्ध्यपेक्षम्। नित्यमेकमनेकानुगतं च। द्रव्यत्वं गुणत्वं, कर्मत्वम् इत्यादीनि सामान्यानि। द्रव्यत्वम् एकमेव, परन्तु सर्वेष्वपि द्रव्येषु अनुगतम्। एवं गुणत्वकर्मत्वाद्यपि। परम्, अपरं चेति सामान्यं द्विविधम्। 'सत्ता' परं सामान्यम्। सामान्यमिदं न केवलं द्रव्यगुणादिषु, तत्सामान्येषु द्रव्यत्वगुणत्वादिष्वपि वर्तन्ते। अत एवास्य परत्वम्। द्रव्यत्वादिसमान्यानि पुनः केवलं द्रव्यादिष्वेव वर्तन्ते; अतः तेषामपरत्वम्। गोत्वघटत्वादि सामान्यानामपि अपरत्वमेव। सामान्यमेव जातिरित्युच्यते।

विशेषः—नित्यद्रव्याणां परमाण्वादीनां परस्परभेदहेतुः विशेषः। एकस्य पार्थिवपरमाणोः अपरस्मात् पार्थिवपरमाणोः को भेदः। अस्मिन् कश्चन विशेषः वर्तते यः अपरत्र नास्ति; अपरत्र च कोऽपि विशेषः वर्तते यः अस्मिन् नास्ति। इमौ विशेषावेव तयोः परस्परं भेदकौ। एतादृशाः नित्यद्रव्यवर्तिनः विशेषाः अनन्ताः। सामान्यम् अनेकानुगततया तेषां कमपि अभेदमिव संपादयति, विशेषः पुनः भेदकारणम्। घटत्वादिसामान्यमपि विशेष एव। घटः पटादिभद्यते। कुतः? घटे घटत्वं विद्यते, न पटे; पटे पटत्वं विद्यते, न घटे। अतः घटत्व-पटत्वे, घटपटौ परस्परं व्यावर्तयत इति तेऽपि विशेषावेव। यदाह कणादः—"द्रव्यत्वं गुणत्वं कर्मत्वं च

Digitization by Arya Samaj Charitable Foundation, Chennai

सामान्यानि विशेषाश्च" (१.२.४) इति। परन्तु परमाण्वादिगतानां सामान्यरूपाणां च विशेषाणां नाममात्रेणैव सादृश्यम्। ते अन्ये, एते च अन्ये। अत एवोक्तम् कणादेन "अन्यत्रान्येभ्यो विशेषेभ्यः" (१.२.८) इति। विशेषाणामभ्युपगमेनैवास्य दर्शनस्य वैशेषिकदर्शनमिति नाम।

समवायः—अयुतसिद्धानाम् (अशक्यविश्लेषाणाम्) सम्बन्धः समवायः। यथा—अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, कार्यसमवायिकारणयोश्च। शाखा अवयवः, वृक्षः अवयवी; शुक्लः गुणः, वासः गुणी। अतश्च शाखावृक्षयोः शुक्लवाससोश्च संबन्धः समवायः।

अभावः—अभावश्चतुर्धा—प्रागभावः, प्रध्वंसाभावः, अन्योन्याभावः, अत्यन्ताभावश्चेति। घटोत्पत्तेः पूर्वं यः घटस्याभावः स प्रागभावः। उत्पन्नः घटः कालान्तरे नश्यति। घटस्य सः अभावः प्रध्वंसाभावः। अस्याभावस्य घटप्रध्वसजन्यत्वात् तत् नाम। "घटः पटो न, पटः घटो न" इति वस्तुनोः परस्परभेदरूपः अभावः अन्योन्याभावः। "हृदे अग्निर्नास्ति" इत्यादिरूपोऽभावः अत्यन्ताभावः।

पृथिव्यादीनां नवानां पदार्थानां स्वरूपमेवं निरूपितं वैशेषिकैः—

पृथिवी— रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-संस्काराः पृथिव्याः गुणाः। एषु गन्धः अस्याः असाधारणो गुणः। नित्या, अनित्या चेति पृथिवी द्विधा। परमाणुरूपा नित्या, द्व्यणुकादिरूपा अनित्या, मानवादीनां शरीराणि, घ्राणेन्द्रियम्, भूमि-शिलादयश्च पृथिव्या एव विभिन्नानि रूपाणि।

जलम्— रूप-रस-स्पर्श-द्रवत्व-स्नेह-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-संस्काराः जलस्य गुणाः। शुक्लं रूपम्। स्पर्शः शीलः। स्नेह-द्रवत्व-शीतस्पर्शाः अस्यासाधारणा गुणाः। नित्यम् अनित्यं चेति जलं द्विविधम्। परमाणुरूपं नित्यम्। द्व्यणुकादिकमनित्यम्। वरुणलोके प्राणिनां शरीराणि जलमयानि। रसनेन्द्रियं जलरूपम्। नदीसमुद्रादयोऽस्य भौतिकरूपाणि।

Digitization by Arya Samaj Charitable Foundation, Chennai

तेजः—रूप-स्पर्श-संख्या-प्रमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-द्रवत्व-संस्काराः तेजसो गुणाः। शुक्लं भास्वरं च रूपम्। उष्णः स्पर्शः। प्रकाश-रूपोष्णस्पर्शौ असाधारणगुणौ। अणुरूपं तेजः नित्यम्, द्व्यणुकादि कार्यमनित्यम्। शरीरेन्द्रियविषयरूपेणास्यापि भेदाः। आदित्यलोकगतानां प्राणिनां शरीरं तैजसम्। चक्षुरिन्द्रियमपि तैजसम्। इन्धनादिजन्यम्, वैद्युतम्, जठराग्निरूपम्, आकरस्थं सुवर्णरूपं चेति विषयरूपं तेजः चतुर्विधम्।

वायुः—स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-संस्काराः वायोः गुणाः। अस्यानुष्णाशीतः स्पर्शः। अणुरूपो नित्यः; द्व्यणुकादिरूपः अनित्यः। शरीर-इन्द्रिय-विषय-प्राणादीनि वायोः चत्वारि कार्याणि। मरुल्लोकग-तानां जीवानां शरीराणि वायव्यानि। शरीरव्यापि स्पर्शेन्द्रियं वायुजन्यम्। झंझा-मारुतादिरूपो वायुः विषयः। शारीराणां धातूनां साम्यवैषम्यहेतुभूताः प्राणापान-व्यानोदानसमानाख्याः वायोरेव जायन्ते।

आकाशः—शब्द-संख्या-परिमाण-पृथक्त-संयोग-विभागाः-आकाशस्य गुणाः। शब्दोऽस्यासाधारणो गुणः। आकाशो नित्यः, सर्वव्यापी, अनन्तश्च। श्रवणरन्ध्रान्तर्गत आकाश एव श्रवणेन्द्रियम्। अस्य शब्दग्रहणशक्तेर्भावाभावौ जीवकृतधर्माधर्मरूपकर्माधीनौ।

कालः—"इदं कार्यं पूर्वं संवृत्तम्-इदं पश्चात्;" "कार्यद्वयमेकदैव संवृत्तम्।" इत्यादिधियः, मन्दत्व-शीघ्रत्वादिबुद्धेश्च हेतुत्वेन कालः अनुमीयते। नित्यानां वस्तूनां विषये "इदं पूर्वं संजातम्, इदं च पश्चात्" इत्यादेर्धियः नैव अवकाशः। अतः अनित्यानां सर्वेषामपि कार्याणां कालस्य निमित्तकारणता अङ्गीक्रियते। अत एव "इमानि पुष्पफलादीनि ग्रीष्मर्तौ लभ्यन्ते, इमानि च वसन्तर्तौ" इत्यादिव्यवहारः दृश्यते। नित्यं द्रव्यं कालः। संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः अस्य गुणाः। अयं विभुः (सर्वव्यापी)। वस्तुतः एकस्याप्यस्य ग्रहसंचारादिभिः बाह्यैः हेतुभिः अनेकत्वेन व्यवहारः।

Digitization by Arya Samaj Charitable Foundation, Chennai

दिक्— समानकालिकयोः द्वयोर्वस्तुनोः "इदमस्माद्दूरे वर्तते" इति वा "इदं तस्य समीपे वर्तते" इति वा प्रत्ययः येन भवति स पदार्थः दिक् । सा च नित्या, एका, सर्वव्यापिनी च । तस्याः संयोगो विभागश्च गुणौ । एकापि दिक् सूर्यादीनां संबन्धवशात् प्राचीप्रतीच्यादिनामभिः व्यवह्रियते ।

आत्मा— आत्मानं अनात्मभ्यो विविच्य आत्मस्वरूपबोधनेन मोक्षोपायप्रदर्शनमेव वैशेषिकदर्शनस्य प्रधानं प्रयोजनम् । सुधा-हरिद्रयोः मेलनेन रागवत्, तत्तद्रव्याणां मेलनेन मादकताशक्तिवच्च विशिष्टेन भूतसमागमेन काचिच्छक्तिः उद्भवति । सैव आत्मा, स च देहे उत्पन्नः देहेन साकं विनश्यति इति मन्यन्ते **चार्वाकाः** । विज्ञानप्रवाह एवात्मा इति **बौद्धाः** । मतद्वयमिदं खण्डयित्वा **कणादः** "आत्मा नित्यः, कतिभिश्चिद्धर्मैः संबद्धः पदार्थविशेषः" इति स्थाप्यति । अवान्तरसृष्टौ आत्मनः सृष्टिर्वा अवान्तरप्रलये तस्य नाशो वा न भवति । आकाशादिवदयमपि प्रत्यक्षगोचरः, साधारणानां जनानां मनसोऽपि न गोचरः, धर्माद्यनुष्ठानेन आध्यात्मिकीमुन्नतिमधिगतवद्भिः कैश्चिदेव आत्मा तद्धर्माश्च साक्षात्क्रियन्ते । अतः आत्मा तद्धर्माश्च अनुमानैकगम्याः, चक्षुरादीन्द्रियाणां घटादिभिः संयोगे यद् ज्ञानं जायते तस्याश्रयः आत्मा । आत्मानश्च अनेके । जगत्सृष्ट्यादीनां निमित्तकारणं परमेश्वरः । वेदाः परमेश्वरप्रोक्ताः । अत एव तेषां प्रामाण्यम् । जीवात्मा अन्यः, परमात्मा चान्यः । तयोः नैवाभेदः । जीवात्मानोऽपि परस्परं भिन्नाः बहुसंख्याकाश्च इति कणादः प्रत्यपादयत् ।

मनः—शरीरान्तःस्थमिन्द्रियं मनः । अत एवास्य अन्तःकरणमिति नाम । सत्यपि विषयेन्द्रियसंबन्धे कदाचित् ज्ञानं जायते, कदाचिच्च न जायते, अनेन च मनसः सत्ता अनुमीयते । सत्यपि इन्द्रियविषयसंयोगे यदि मनः इन्द्रियेण न संबध्यते तदा ज्ञानं नोदेति, यदि संबध्यते तदा ज्ञानमुदेति । अतः ज्ञानोत्पत्तिकरणतया मनः अनुमीयते । संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-संस्काराः मनसो गुणाः । एकस्मिन् क्षणे ज्ञानद्वयं न जायते । अतः एकैकस्मिन् शरीरे एकैकमेव मनः भवतीति, तच्च अणुपरिमाणमिति अङ्गीक्रियते कणादेन ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मनि ज्ञानोत्पत्तेरयं क्रमोऽङ्गीकृतः कणादेन—प्रथमम् आत्मा मनसा संयुज्यते। मनः इन्द्रियेण संयुज्यते। इन्द्रियं विषयेण संयुज्यते। ततो जायते विषयप्रत्यक्षम्। एवम् इन्द्रियजन्येषु सर्वेष्वपि ज्ञानेषु मनसः साहाय्यं नितरामावश्यकम्। अत एव नवमपदार्थतया मनः अङ्गीकर्तव्यम्।

कार्यकारणभावः—कार्यस्य सर्वस्यापि कारणेन केनचिदवश्यं भवितव्यम् इति मानवेन ज्ञातम् सुमहत्सत्यम्। अत एव किल दृश्यमानानां कार्याणां कारणानि गवेषयद्भिः विबुधैः महती वैज्ञानिकी प्रगतिः साधिता दृश्यते। इदमेव किल वैज्ञानिकं परिशोधनं यत् कार्यस्य यत् कारणं तस्य अन्वेषणम्। अतीव प्रधानमेतं कार्यकारणभावसंबन्धं तप्रथमतया **कणाद** एव महता प्रबन्धेन प्रत्यपादयत्। एतदुपदिष्ट एव मार्गः पश्चादनुसृतः **सांख्य**आदिभिः अन्यैर्दार्शनिकैः।

कारणं त्रिविधं—समवायिकारणम्, असमवायिकारणम्, निमित्तकारणं चेति। यतः कार्यं न पृथक्कर्तुं शक्यते तत् समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्। तन्तूनां संयोगः पटस्य असमवायि कारणम्। तुरीवेमादिकं निमित्तकारणम्। एवं सर्वेषां कार्याणां त्रिविधानि कारणानि भवन्ति। एषु समवाय्यसमवायिकारणे असाधारणकारणे। यतः यस्यैते कारणतया उच्यन्ते तस्यैव ते कारणे नान्यस्य। निमित्तकारणं पुनः साधारणनिमित्तकारणम्, असाधारणनिमित्तकारणं चेति द्विधा। यथा पटस्य तुरीवेमादिकम् असाधारणं निमित्तकारणम्। कार्यसामान्यस्य निमित्तकारणतया केचिदङ्गीक्रियन्ते। ईश्वरः, ज्ञानम्, इच्छा, ईश्वरव्यापारः, दिक्, कालः, अदृष्टम्, प्रागभावश्चेत्येते अष्टौ कार्यमात्रं प्रति निमित्तकारणानीति तानि साधारणनिमित्तकारणानीत्युच्यन्ते।

परमाणवः—परमाणुवादः प्रथमतया कणादेन स्थापितः, शकल-कणादिरूपेण भेद्यमानेषु पृथिव्यादिषु चतुर्षु पदार्थेषु अन्ततः योंऽशः सुसूक्ष्मः, अभेद्यः परिशिष्यते स एव परमाणुः यो हि इन्द्रियाणां न गोचरः।

जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः।
तस्य षष्ठस्तु यो भागः परमाणुः स कीर्तितः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इति परमाणुस्वरूपं वर्णयन्ति काणादाः । परमाणूनां प्रधानलक्षणानि—

(१) परमाणवः अभेद्याः, नित्याश्च ।

(२) परमाणवः स्वयं न किमपि कार्यं जनयितुं प्रभवन्ति । ईश्वरेच्छा-अदृष्टादिसहकृता एव ते कार्याण्युत्पादयन्ति । अन्यथा तेषां नित्यत्वात् सर्वदा कार्याणि जनयन्त एव वर्तन्ते इति वक्तव्यं स्यात् ।

(३) पृथिव्यादीनां परमाणुषु तत्तदसाधारणगुणाः भवन्ति । यथा पृथिवीपरमाणौ गन्धः, वायुपरमाणौ स्पर्शः इत्यादि ।

(४) परमाणवः अतीन्द्रियाः । चक्षुरादिगोचराः न भवन्ति ।

(५) विना पृथिवीपरमाणून् अन्येषु परमाणुषु स्थिताः गुणा अपि नित्याः । पृथिवीपरमाणुगतास्तु गुणाः पाकेन परिवर्तन्ते ।

(६) परमाणव एव जगतः उपादनकारणम् (समवायिकारणम्) ।

(७) यथा एकः परमाणुः इन्द्रियागोचरः तत्र परमाणुपुञ्जा आपि इन्द्रियागोचरा एव ।

(८) एकैकस्मिन् परमाणौ एकैको विशेषो भवति । ते विशेषा एव परमाणूनां परस्परविभेदकारणम् ।

यदा जीवानां अदृष्टं सुकृतदुष्कृतरूपं फलोन्मुखं भवति, तदा ईश्वरस्येच्छया परमाणुषु चलनमुत्पद्यते । द्वयोः परमाण्वोः संयोगात् द्व्यणुकमुत्पद्यते । परमाणोः परिमाणं अणुपरिमाणम्, द्व्यणुकस्यापि परिमाणम् अणुपरिमाणमेव । अतः अणुवत् द्व्यणुकमपि इन्द्रियागोचरम् । त्रयाणां द्व्यणुकानां संयोगात् त्र्यणुकमुत्पद्यते अस्यैव त्रसरेणुः इति नामान्तरम् । पिहितकवाटे अपवरके कुतश्चित् रन्ध्रात् अन्तः प्रविष्टे सूर्यकिरणे दृश्यमानाः त्रसरेणव एव । त्रसरेणोः परिमाणं महत्परिमाणम् । एतस्मादारभ्य सर्वेषामपि कार्याणां परिमाणं महत्प्रमाणमेव । एवं भूतभौतिकसृष्टिः जायते । महाप्रलये सर्वाण्यपि महाभूतानि परमाणुपर्यन्तं विशीर्यन्ते । अयमेव तेषां नाशः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

परमाणुसंयोगेनोत्पन्नेषु पदार्थेषु तेजःसंयोगात् केचित् विपरिणामाः (Chemical changes) भवन्ति। अत्यधिकेन औष्ण्येन परमाणुपर्यन्तं विशीर्यन्ते पदार्थाः। परमाणूनां रूपादिष्वपि विपरिणामो भवति। तस्यैव तेजसः शक्त्या ते परमाणवः पुनः संहता भवन्ति। तेषां संघातानां स्वरूपं विपरिणामं भजते। तद्यथा—मृदा निर्मितो घटः वह्नेः तेजसा तप्तः आपरमाणु विशीर्णो भवति। तेनैव तेजसा पुनः संघातितः नूत्नैः रूपादिभिः नूतनो घटः निष्पद्यते। एवं न केवलं प्रलयकाले, स्थितिसमयेऽपि पदार्थानां परमाणुपर्यन्तं विशीर्णता, पुनश्च संघटितत्वं जायते।

लयूसिप्पस् (LUICEPPUS), **डेमोक्रिटस्** (DEMOCRITUS) इत्यादिभिः ग्रीसदेशैर्यैर्विद्वद्भिः परमाणुवादे केचित् सिद्धान्ताः, प्रवर्तिताः। परन्तु कणादप्रवर्तितेन सिद्धान्तेन तोलने ते सिद्धान्ताः अतीव प्राथमिकदशायामासन्निति उपलक्ष्यते। केचित् भारतीयसिद्धान्ताः ग्रीक्देशीयैः परिगृहीताः इति निरूपणप्रसङ्गे "अस्मिन् विषये (परमाणुसिद्धान्तविषये) भारतीयैरेव पथिप्रदर्शनं कृतम्; ग्रीक्देशीयाश्च तं पन्थानमन्वसरन्" इति **कोलबुक** (Cole book) वचनं बहवः पाश्चात्यविद्वांसः अङ्गीकुर्वन्ति।

जगतः सत्यताम् अङ्गीकरोति कणादः। कालान्तरे शास्त्रेणानेन संमिलितस्य **न्यायशास्त्रस्य** प्रवर्तकः **गौतमो**ऽपि जगत्सत्यतावाद्येव। जगदिदं प्रत्यक्षादिभिः यथा ज्ञायते तथैवास्तीत्यङ्गीकृत्य मूलकारणानाम् अन्वेषणे कृते एते सप्तैव पदार्था मूलभूता इत्यायाति। तेषां स्वरूपस्वभावादिकं विदित्वा आत्मस्वरूपस्यापि सम्यगवगमने मोक्षः लभ्यते इति कणादस्य सिद्धान्तः।

एवं भारतदेशीयप्राचीनर्षिवत् महामनीषिणा कणादेनापि स्वीये दर्शने भौतिकविज्ञानात्मज्ञानयोः अविनाभावसम्बन्धः, परस्परोपाकारिता च प्रतिपादिते।

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

कौटिल्यः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

कौटिल्यः

(क्रिस्तोः पूर्वं ४०० वर्षसमीपगः)

शास्त्रान्तरवत् अर्थशास्त्रस्यापि अतीव पुरातनः इतिहासः वर्तते।महामेधासंपन्नः **कौटिल्यः** पुरातने अर्थशास्त्रवाङ्मये संनिविष्टान् सर्वानपि विषयान् सम्यगाकलय्य स्वीयां च राज्यव्यवहारदक्षतां मेलयित्वा **अर्थशास्त्राख्यमत्युत्तमं** ग्रन्थं निर्ममे। कौटिल्यस्य पित्रा कृतं नाम **विष्णुगुप्त** इति। चणकपुत्रत्वात् अथवा चणकाख्यग्रामजन्यत्वात् चाणक्य इत्यपि नाम्नाऽयं ज्ञायते। यथा कथंचित् कार्यं साधनीयमिति कार्यसाधनस्यैव प्राधान्यं वदता अनेन अर्थशास्त्रे कुटिलाः अनेके उपायाः उपदिष्टाः; अत एवायं कालान्तरे **कौटिल्य**नामाभवदिति वदन्ति केचित्। परन्तु कौटिल्य इति गोत्रनामेदमित्यभिप्रैति **शामशास्त्री**।

कौटिल्यस्य, तद्रचितस्य अर्थशास्त्रस्य च बहवो निर्देशाः पुरातनग्रन्थेषूपलभ्यन्ते। परन्तु **अर्थशास्त्रम्** नष्टप्रायमेवाभवत्। ग्रन्थस्यास्य नष्टप्रायस्य पुनः संपादनकीर्तिः मैसूर-नगरस्थ प्राच्यसंशोधनालये अधिकृतेन श्रीमता **शामशास्त्रिणा** लब्धा। ग्रन्थस्यास्य सुविस्तृतवर्णनेन साकं स पण्डितप्रवरः कांश्चिद् भागान्, १९०५ तमे वर्षे **इण्डियन् एण्टिक्वेरी** इति पत्रिकायां प्राचीकटत्। सम्यक् संपादितं संपूर्णं ग्रन्थं १९०९ तमे वर्ष प्राकाशयत्। "कौटिल्यः चन्द्रगुप्तस्य अमात्यः; तेनैव च अर्थशास्त्रं विरचितम्। तदेवेदम्" इति पाण्डित्यमहिम्ना भरितायां भूमिकायां सयुक्तिकं, सप्रमाणं च प्रत्यपादयत्।

भारतीयप्राचीनानेकग्रन्थान्तरविषये इव अस्यापि ग्रन्थस्य विषये बहवः पाश्चात्यपण्डिताः बह्वीः विप्रतिपत्तीः प्रकाशयामासुः। "ग्रन्थोऽयं क्रिस्तशकस्य तृतीयशताब्द्यां केनापि रचितः। कौटिल्य इति च कल्पितोऽयं रचयिता" इति

Digitization by Arya Samaj Charitable Foundation, Chennai

डा०औवी अलिखत्। **विंटरनेट्ज्, कीथ** प्रभृतिभिरपि एतादृश एवाशयः प्रकटितः। परन्तु हिल्ब्रार-हर्टल्-याकोबी-स्मित्-प्रभृतयो विद्वांसः शामशास्त्रिणो मतं समर्थयामासुः। औवीपण्डितेन कृतान् वादान् खण्डयित्वा **डा० जस्वाट्**-महोदयेन "एतादृशस्य उद्ग्रन्थस्य वञ्चनाग्रन्थ इति दूषणं महदिदं साहसम्। कौटिल्यः नैव कल्पितः पुरुषः। असौ क्रिस्तोः पूर्वं ३२५-२७३ वर्षेषु चन्द्रगुप्तमौर्यस्य महामात्य आसीत्। तेनैव चायं ग्रन्थः क्रिस्तोः पूर्वं चतुःशततमवर्षादारात् निर्मितः" इति प्रतिपादितम्। **श्रीजयचन्द्रविद्यालङ्कारेणापि भारतीय इतिहास की रूपरेखा** इति ग्रन्थे कीथेन प्रदर्शिताः युक्तीः सर्वाः सप्रमाणं खण्डयित्वा उपर्युक्तं मतं समर्थितम्।

अर्थशास्त्रस्यास्य प्रभावः बहोः कालात् प्रभृति पुरातने भारतीये वाङ्मये प्रसृतो दृश्यते। **कामन्दकः** (४००.A.D.) "अर्थशास्त्रमेवानुसृत्य मया अयं ग्रन्थः निर्मीयते। विष्णुगुप्तापरनामधेयेन कौटिल्येनार्थशास्त्रं विरचितम्। कौटिल्येनानेनैव नन्दवंशमुन्मूल्य मौर्यचन्द्रगुप्तः सिंहासनमधिरोपितः" इति स्वीये **नीतिसाराख्ये** ग्रन्थे अकथयत्। **कालिदास-भारवि-माघादीनां** काव्येष्वपि अर्थशास्त्रस्य प्रभावः दृश्यते। दण्डि-बाणभट्टाभ्यां पुनरस्य नामापि निर्दिष्टम्। क्रिस्तशाकस्य ३०० तमवर्षसमीयपगते पञ्चतन्त्रे चाणक्यस्य नाम गृहीतम्। कौटिल्यस्य चरितमेव **विशाखदत्तेन**(६०० A.D.) स्वीये **मुद्राराक्षस** नाटके कथावस्तुतया उपनिबद्धम्। एवं प्राचीनात् कालात् प्रभृति कौटिल्येन, तद्विरचितेन अर्थशास्त्रेण च भारतीयवाङ्मये सुस्थिरं स्थानं संपादितमित्यत्र न किमप्याश्चर्यम्। एतदीययाथार्थ्यविषये पाश्चात्यैः कैश्चित् आविष्कृता शङ्कैव आश्चर्यजनिका।

अर्थशास्त्रे पञ्चदश अधिकरणानि सन्ति। एकैकमप्यधिकरणम् अध्यायरूपेण विभक्तम्। आहत्य १५० अध्यायाः सन्ति। प्रायः प्रधानविभागः अध्यायरूपेण अवान्तरविभागश्च अधिकरणरूपेण दृश्यते शास्त्रग्रन्थेषु। कौटिल्येन कृतो विभाग एतद्विपरीतः। **वात्स्यायनस्य कामसूत्रे** अर्थशास्त्रानुकरणच्छायाः अधिकं दृश्यन्ते। तत्राप्यधिकरणाध्यायविभागः एवमेव कृतः। **काव्यमीमांसायां राजशेखरेणापीय**मेव रीतिरनुसृता। मार्किं षट्सहस्रग्रन्थपरिमितमिदमर्थशास्त्रं अतीव हृद्यया

Digitization by Arya Samaj Charitable Foundation, Chennai

सुबोधया रीत्या, सूत्रसदृशेषु लघुषु वाक्येषु निर्मितम्। (ग्रन्थे ३२ अक्षराणि स्युः। गद्यरूपो वा भवतु पद्यरूपो वा; सर्वस्यापि ग्रन्थस्य प्रमाणं द्वात्रिंशदक्षरात्मक-ग्रन्थसंख्यया क्रियते। सेयं संस्कृतशास्त्रग्रन्थेषु अनुसृता रीतिः)। तत्र तत्र श्लोका अप्युपनिबद्धाः। राज्यस्य विविधान्यङ्गानि पालनरीतिः, प्रजानां कर्तव्यानि इत्यादयो विषयाः ग्रन्थेऽस्मिन् सविस्तरं प्रतिपादिताः।

प्राचीनेषु अर्थशास्त्राचार्येषु प्रधानतया प्रथितयोः **शुक्रबृहस्पत्योः** प्रणाम-पूर्वकेण "नमः शुक्रबृहस्पतिभ्याम्" इति वाक्येन शास्त्रारम्भः कृतः कौटिल्येन। ग्रन्थरम्भे तद्गतानां विषयाणामपि सूचिका तेनैव दत्ता।

विनयाधिकरणनाम्नः प्रथमधिकरणस्य प्रथमेऽध्याये आन्वीक्षकी, त्रयी, वार्ता दण्डनीतिश्चेति विद्याश्चतस्रः इति, धर्माधर्मज्ञाने उपयुञ्जते एताः इति प्रतिपादितम्। सांख्य-योग-लोकायतानां 'अन्वीक्षकी' इति नामा। अत्र लोकायतपदस्यार्थः "लौकिकविषयसंबद्धं शास्त्रम्" इति। आन्वीक्षकी सर्वविद्यानाम् उपायः इति प्रश-स्यते कौटिल्येन।

द्वितीयाध्यायः— ऋग्यजुःसाम्नां त्रयी इति नाम। अथर्ववेद-इतिहासवेदयो-रपि वेदत्वमङ्गीक्रियते। चतुर्णां वर्णानाम् आश्रमाणां च संक्षिप्तं वर्णनं दत्तम्।

तृतीयाध्यायः—कृषि-पशुपालन-वाणिज्यानि वार्ता। अनया धनं संपाद्यते। आन्वीक्षकीत्रयीवार्तानां योगक्षेमयोः साधनं दण्डः। दण्डविषये राज्ञा अतितीक्ष्णेन अतिमृदुना वा न भाव्यम्। तीक्ष्णदण्डं राजानं संन्यासिप्रभृतयोऽपि द्विष्युः, किमुत गृहस्थाः। मृदुदण्डः राजा प्रजाभिः परिभूयते। सर्वथा च दण्डाभावे प्रजासु मात्स्य-न्यायः विजृम्भेत; महान्तः मत्स्याः अल्पप्रमाणान् मत्स्यान् यथा ग्रसन्ते तद्वत् बलिनः दुर्बलान् पीडयेयुः। अतः आवश्यकतानुसारेण सम्यग् मन्त्रयित्वा दण्डो विधेयो राज्ञा—"तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते। यथार्हदण्डः पूज्यः...अप्रणीतो हि मात्स्यन्यायमुद्भावयति। बलीयानबलं हि ग्रसते दण्डधरा-भावे" (१.१.३)।

वृद्धसेवां कुर्वता राज्ञा विविधा विद्याः अभ्यसनीयाः विनयसंपच्च वर्धनीया इति प्रतिपादितं वृद्धसंयोगाख्ये चतुर्थाध्याये।

Digitization by Arya Samaj Charitable Foundation, Chennai

कामक्रोधाद्यवशेन राज्ञा इन्द्रियजयः कर्तव्यः इति, इन्द्रिजयाभावेन विनष्टानां केषांचित् पुरातनराजानां कथाः कथयित्वा प्रतिपादितं इन्द्रियजयाख्ये पञ्चमाध्याये ।

अमात्यनियुक्तिनाम्नि सप्तमेऽध्याये कीदृशानां अमात्यत्वेन नियुक्तिः कर्तव्या इति चर्चा प्रवर्तिता । "सम्यग् ज्ञातस्वभावाः सहाध्यायिनः अमात्यत्वेन नियोजनीयाः" इति किलावदत् **भारद्वाजः** । "अति परिचयात्ते राजानमवजानीयुः; अतः आत्मना समानव्यसनिनः गुह्यसमानधर्माणश्च अमात्यान् कुर्वीत । ते 'अयम् अस्माकं मर्माणि जानाति ।' इति भयात् राजनि नापराध्येयुः" इति **विशालाक्षस्य** आशयः । तैरपि किल राज्ञः मर्माणि ज्ञायन्ते । अतः तेभ्यः राज्ञोऽपि भयमेव । अतः "ये आपत्सु प्राणबाधायुक्तासु अनुगृह्णीयुः तानेव अमात्यान् कुर्यात्" इति **पराशरस्य** मतम् । तादृशाः राजभक्ताः भवेयुर्नाम । राजभक्तिः बुद्धिगुणः न भवति । अतः "ये वा राजकार्याणि सम्यक् सविशेषं साधयेयुः तानेवामात्यान् कुर्वीत" इति **जगाद** पिशुनः ।" एतेषु अन्ये अमात्यगुणाः न स्युः । अतः पितृपैतामहान् अमात्यान् कुर्वीत । सगन्धाः खलु अपचरन्तमपि राजानं न त्याजेयुः इति **कौणपदन्त** आह । "ते राजकुलसंबद्धं सर्वमपि जानन्ति । अतः राज्ञः सर्वानधिकारान् स्वायत्तान् कर्त्तुं प्रयतेरन् । अतः नीतिविदः नवान् अमात्यपदेषु नियुञ्जीत" इति **वातव्याधिनो** मतम् । "अदृष्टकर्मा (कर्मनिर्वहणाभ्यासविहीनः) शास्त्रविदपि क्लिष्टेषु कर्मसु विषादं गच्छेत् । अतः गुणानामेव प्राधान्यं ददता राज्ञा अभिजन-प्रज्ञा-शौच-शौर्य-अनुरागयुक्ताः अमात्यपदेषु नियोक्तव्याः" इत्यवदत् **बाहुदन्तीपुत्रः** । एवं पूर्वेषां मतानि निर्दिश्य **कौटिल्यः** स्वीयं मतं—"सर्वमुपपन्नमिति कौटिल्यः । कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते, सामर्थ्यतश्च" इति उपन्यस्यति ! पूर्वोक्तेभ्यः सर्वेभ्योऽपि पुरुषान् उच्चित्य तेषां सामर्थ्यं, कार्यस्वभावञ्च परिशील्य अमात्यपदेषु नियोगः कर्तव्य इत्यर्थः । अन्ते वदति—

विभज्यामात्यविभवं देशकाले च कर्म च ।
अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः ॥ इति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ये वा राज्ञः अतीव सन्निहिताः विश्वासपात्रभूताः मन्त्रे तस्य साहाय्यं कुर्वन्ति ते मन्त्रिणः। राज्ञा विविधेषु राज्यकार्येषु नियुक्ताः अमात्याः (अद्यतन-सेक्रटरी-तुल्याः) इति सूच्यते अनेन श्लोकेन।

कीदृशः मन्त्रित्वेन नियोक्तव्यः, पुरोहितेन च कीदृशेन भाव्यम् इति अष्टमाध्याये प्रतिपादितम्। स्वदेशीयः, उत्तमवंशसंजातः, दुर्गुणरहितः, ललितकलासु निपुणः, अर्थशास्त्रज्ञः, बुद्धिमान्, मेधावी, चतुरः, उत्साहप्रभावशाली, कष्टसहः, शुचिः (man of integrity), स्नेहशीलः, दृढभक्तिः, शील-बल-आरोग्य-गाम्भीर्य-मण्डितः, गर्वहीनः, चापल्यरहितः, प्रियदर्शनः, वैराणाम् अकर्ता च पुरुषः मन्त्रिपदे नियोक्तव्यः। वेदवेदाङ्गप्रवीणः, अथर्वप्रक्रियासु निष्णातः, दैव-मानुषोपद्रवप्रतीकारक्षमश्च पुमान् पुरोहितपदे स्थापनीयः।

तत्तदुपधा-(प्रलोभन) प्रदर्शनेन गूढतया अमात्यानां शौचाशौचपरीक्षणं नवमाध्याये निरूपितम्। गूढचराणां नियुक्तिः, तत्परीक्षा च दशमैकादशाध्याययोर्विषयः। स्वविषये (स्वराष्ट्रे) पौरजानपदानां स्ववशे स्थापनोपायाः द्वादशाध्याये वर्णिताः। तैस्तैर्वञ्चनोपायैः शत्रुराष्ट्रगतानां प्रजानां स्ववशे स्थापनं त्रयोदशाध्यायस्य विषयः।

अधिकाराख्यः चतुर्दशाध्यायः—राजा उत्तमैः मन्त्रिभिः साकं मन्त्रं कुर्यात्। मन्त्रिणां संख्या विषये पूर्वाचार्याणां मतानि निर्दिश्य कौटिल्यः—"मन्त्रिभिः त्रिभिः चतुर्भिर्वा मन्त्रयेत। मन्त्रयमाणो ह्येकेन अर्थकृच्छ्रेषु निश्चयं नाधिगच्छेत्। एकश्च मन्त्री यथेष्टमनवग्रहः (अप्रतिबन्धः) चरति। मन्त्रयमाणो द्वाभ्यां संहताभ्याम् अवगृह्यते (यदि तौ अन्योन्यमिलितौ तदा राजानमपथे प्रवर्तयतः) विगृहीताभ्यां विनाश्यते। त्रिषु चतुर्षु वा नैकान्तं कृच्छ्रेणोपपद्यते महादोषम्। उपपन्नं तु भवति" (१.१४) इति वदति। मन्त्रस्य च पञ्चाङ्गानि—"कर्मणाम् आरम्भोपायः, पुरुषद्रव्यसंवत्, देशकालविभागः विनिपातप्रतीकारः, कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः" (१.१४)।

Digitization by Arya Samaj Charitable Foundation, Chennai

मन्त्रिणां परिषदि कियन्तो वा मन्त्रिणः भवेयुरिति प्रश्ने—द्वादशमन्त्रिणः भवेयुरिति **मनुमतातुसारिणः**, षोडश भवेयुरिति **बृहस्पतिमतानुयायिनः**, विंशतिसंख्याकाः इति **शुक्रमतानुसारिणश्च** अवदन्नित्युक्त्वा कौटिल्यः "यथासामर्थ्यम्" इति आत्मनः मतं प्राचीकटत्। "आसन्नैः सह कार्याणि पश्येत्; अनासन्नैः सह पत्रसंप्रेषणेन मन्त्रयेत" (१.१४)। प्रसङ्गेऽस्मिन् इन्द्रस्य मन्त्रिपरिषदि सहस्रं ऋषयः आसन्। अत एवासौ सहस्राक्ष इत्युच्यते इति कौटिल्येनोक्तम्—"इन्द्रस्य हि मन्त्रिपरिषद् ऋषीणां सहस्रम् स तच्चक्षुः। तस्मादिमं ध्वक्षं सहस्राक्षमाहुः" (१.१४)

दूताः, तल्लक्षणानि च पञ्चदशाध्यायस्य विषयः। राज्ञा पुत्राः कथं वर्धनीयाः, कथं वा तेषाम् आत्मविषये प्रातिकूल्यं न भवेत्, प्रतिकूलाश्च ते कथं नाशनीयाः इत्यादयो विषयाः षोडशाध्याये प्रतिपादिताः। कोपितपितृणां राजपुत्राणां प्रवृत्तिः, तेषां कर्तव्यं च सप्तदशाध्यायस्य विषयः।

अष्टादशाध्यायः—दिवसं, रात्रिं च अष्टसु अष्टसु भागेषु विभज्य राज्ञा तेषु तेषु भागेषु नियमानुसारेण राज्यकार्याणि, स्वकार्याणि च निर्वोढव्यानि। व्यवहारावेक्षणकाले राजा स्वसमीपम् आगच्छत्सु न कमपि निवारयेत्। अन्यथासौ प्रजानां कोपस्य लक्ष्यीभवेत्। आत्ययिकानि कार्याणि (works of emegency) विना कालातिपातं (post-ponement) सद्य एव पश्येत्। कालातिपाते हि तदेव कर्म कृच्छ्रसाध्यम् असाध्यं वा भवेत्।

सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत्।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वा विजायते॥ (१.१८)

प्रजानां सुखमेव राज्ञः सुखम्। प्रजानां हितमेव राज्ञो हितम्। राज्ञः आत्मप्रियं हितं न भवति। प्रजानां यत् प्रियं तदेव राज्ञो हितम्।

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥ (१.१८)

प्रासादे, अन्तःपुरे च राज्ञा कीदृशाः आत्मरक्षणोपायाः अनुसर्तव्याः, निषादादिभ्यः कथम् आत्मा रक्षितव्यः इत्यादि एकोनविंशतितमे अध्याये प्रतिपादितम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

दुर्गात् बहिर्नीयमानं, दुर्गान्तरानीयमानं च सर्वं वस्तु पुस्तकनिबद्धं (Registered) कर्तव्यम्। सर्वमपि वस्तु राजमुद्राङ्कितं कुर्यात्।

सर्वं चावेक्षितं द्रव्यं निबद्धागमनिर्गमम्।
निर्गच्छेदधिगच्छेद्वा मुद्रासंक्रान्तभूमिकम्॥ (१.१९)

आत्मरक्षिताख्ये विंशतितमे अध्याये राज्ञा ग्रहीतव्याः आत्मरक्षणोपायाः वर्णिताः। अतिपरिचिता अपि अन्तिकोपसर्पणात् निरोद्धव्याः। अन्नादिषु विषनिक्षेपपरीक्षोपायाः वर्णिताः, वस्त्रालंकारादयोऽपि सम्यक् परीक्ष्य धर्तव्याः। यानोद्यानादिषु च नितरां राज्ञा जागरूकेण भवितव्यम्।

द्वितीयस्याधिकरणस्य **जनपदनिवेशः** इति नाम। तस्य प्रथमेऽध्याये ग्रामाणां निवेशनम्, जलमार्गसेत्वादीनां निर्माणम् इत्यादयो विषयाः प्रतिपादिताः। बालवृद्ध-व्याधिग्रस्त-अनाथादीन् राजा पोषयेत्। बालस्य द्रव्यम् तस्य आव्यवहारप्रापणात् (till he becomes major) ग्रामस्थैः रक्षणीयम्। ये वा सत्यपि सामर्थ्ये भार्यां, पुत्रान्, पितरौ अप्राप्तव्यवहारान् भ्रातॄन्, अनूढाः सहोदरीः, भर्तृविहीनाः सोदरीश्च न पोषयन्ति ते दण्डनीयाः। परन्तु पतितानां तेषाम् अपोषणं नापराधः। पतितामपि मातरं पोषयेदेव। कुटुम्बस्य पोषणे व्यवस्थाम् अकृत्वैव ये संन्यासिनो भवन्ति, ये च स्त्रियं संन्यासिनीं कुर्वन्ति ते दण्डनीयाः। राष्ट्रे वानप्रस्थानां निवासेऽपि न दोषः; संन्यासिनां पुनः राष्ट्रे निवासः निषेधनीयः। सहकारसंघेभ्यः अन्ये संघा वा, संस्था वा जनपदे नैव निवसेयुः। नट-नर्तक-गायकादयः ग्रामेषु न वसेयुः, यतः तैः कृषिकर्मणो विघ्नः उत्पद्यते।

द्वितीयाध्यायस्य नाम 'भूमिच्छिद्रविधानम्' इति। कृषौ अनुपयुक्ता भूमिः पशुग्रासार्थं विधातव्या। क्रोशद्वयपरिमिताम् अरण्यभुवं ब्राह्मणानां वेदाध्ययनयज्ञाद्यनुष्ठानार्थं पृथक् स्थापयेत्। तावत्प्रमाणामेव भूमिं ऋषीणां तपश्चर्यायै पृथक् कुर्यात्। अनेकवृक्षमण्डितम्, अपनीतनखदंष्ट्रैः मृगैः अध्युषितं च वनं राज्ञो विहारार्थं कल्पयेत्। विविधदेशेषु उपलभ्यैः मृगैः सहितं एकं मृगवनं ३००(ज़ू) प्रकल्पयेत्। राष्ट्रसीमासु गजैः पूर्णं निविडं नागवनं भवेत्।

Digitization by Arya Samaj Charitable Foundation, Chennai

'दुर्गविधान-दुर्गनिवेश'-नाम्नोः तृतीयचतुर्थाध्याययोः जलदुर्ग-पर्वतदुर्ग-धान्वनदुर्ग-(मरुभूमिदुर्ग) वनदुर्गाणाम् निर्मितिः, तेषु विविधगृहाणां, रथ्यादीनां च निर्माणम् इत्यादयो विषयाः प्रतिपादिताः। 'संनिधातृनिचय' नाम्नि पञ्चमेऽध्याये कोशागृहनिर्माणम्, कोशाध्यक्षस्य कर्माणि च वर्णितानि। यदि कश्चित् कृत्रिमाणि नाणकानि आहरति तानि परीक्ष्य तानि तत्रैव छेदयेत्। आहर्तारं च दण्डयेत्। अपरिशुद्धधान्योपाहर्तृन् दण्डयेत्। जनपदेभ्यः कियद्धनमागतं, नगरात् कियदागतम्, कियद्वा व्ययितम्, कियद् अवशिष्टम् इति शतवर्षसंबद्धामपि गणनां झटित्येव कथयितुं सन्नद्धेन भवितव्यं कोशाध्यक्षेण—

बाह्यमाभ्यन्तरं चायं विद्याद्वर्षशतादपि।
यथा पृष्टो न सज्येत व्ययशेषं च दर्शयेत्॥ (२.५)

"समाहर्तृसमुदयप्रस्थापन"-नाम्नि षष्ठाध्याये समाहर्त्रा (collector of taxes) विधातव्यानि कार्याणि, "अक्षपटलगाणनिक्याधिकार"-नाम्नि सप्तमाध्याये अक्षपटले (Accounts office) गणनाध्यक्षेण (Superintendent of accounts) कर्तव्याः गणनपुस्तकसंरक्षणादयः विधयः, अष्टमाध्याये राष्ट्रद्रव्यलुण्टाकाणाम् अधिकृतानां दण्डनविधयश्च प्रतिपादिताः। अधिकृतैः राजधनापहारप्रकारवर्णनावसरे तैः अनुसृताः गणनविपर्यय-पुस्तकानुल्लेखनादयः चत्वारिंशत् उपायाः प्रदर्शिताः।

नवमाध्याये—धनेन व्यवहरन्तः अध्यक्षाः (Heads of the departments) यथा कथंचित् धनम् अपहर्तुं प्रयतेरन्। अतः तेषां पर्यवेक्षणे जागरूकेण भाव्यं राज्ञा इति कथनप्रसङ्गे लिखति कौटिल्यः—

यथा ह्यनास्वादयितुं न शक्यं
जिह्वातलस्थं मधु वा विषं वा।
अर्भस्तथाह्यर्थचरेण राज्ञः
स्वल्पोऽप्यनासादयितुं न शक्यः॥ (२.९.) इति।

Digitization by Arya Samaj Charitable Foundation, Chennai

"शासनाधिकार"-नाम्नि दशमाध्याये राज्यपालनसंबद्धानां विविधानां-शासनानां लेखनपद्धतिः निरूपिता। प्रसङ्गेऽस्मिन् भाषासंबद्धाः अनेके विषयाः कथिताः। लिङ्ग-वचन-कारक-क्रियादीनाम् अयथावत् प्रयोगेण दुष्टानाम् अपशब्दानां प्रयोगः न कर्तव्यः। संप्लवदोषः, वर्गस्य (Punctuation mark) अस्थाने स्थापनरूपो दोषः, यथा न भवेत् तथा जागरूकैः भवितव्यम्।

"कोष्ठप्रवेश्यरत्नपरीक्षाख्ये" एकादशेऽध्याये कोष्ठाध्यक्षेण कीदृशानि वा वस्तूनि कोष्ठे संग्रहीतव्यानीति प्रतिपादितम्। प्रसङ्गेऽस्मिन् विविधरत्नजातीनां, अगरुचन्दनादीनां सुगन्धद्रव्याणां, विविधवस्त्रादीनां च वर्णनं कृतम्।

"आकरकर्मान्तप्रवर्तन"-नाम्नि द्वादशाध्याये विविधानामाकरजानां वस्तूनां संग्रहविक्रयौ, "अक्षशालायां सुवर्णाध्यक्षः" इति त्रयोदशाध्याये सुवर्णरजतयोः विषये सुवर्णाध्यक्षेण अवलम्बनीयाः विशिष्टाः शोधनसंरक्षणाद्युपायाश्च प्रतिपादिताः। चतुर्दशेऽध्याये सौवर्णिकेण (राज्ये प्रधानसुवर्णकारेण) प्रजाभ्यः कथं वा अलंकाराः निर्मातव्याः इत्यादि प्रत्यपादि। प्रसङ्गेऽस्मिन् स्वर्णकाराः कैः कैर्वा उपायैः स्वर्णम् अपहरन्ति इति वर्णितम्। पञ्चदशाध्याये विविधधान्यादिसंग्रहे कोष्ठागाराध्यक्षेण अनुसर्तव्याः पद्धतयः, प्रमाण-मूल्यादिनिर्णयविधयश्च विशदीकृताः। पण्यानां वस्तूनां कथं वा संग्रहः कर्तव्यः पण्याध्यक्षेण (chief supervisor of markets) कथं वा तेषां विक्रयः करणीयः इति षोडशाध्याये निरूपितम्। अनेन ज्ञायते प्रायः वाणिज्यं राज्यपालकेनैव नियमितमासीदिति। सप्तदशाध्याये कुप्याध्यक्षस्य (Head of the forest department) विधयः, अरण्येषूपलभ्यमानाः सुदारुदातारः उत्तमजातीयाः वृक्षाः, अन्यानि च वन्यानि वस्तूनि वर्णितानि। अष्टादशाध्याये विविधायुधवर्णनपूर्वकम् आयुधगाराध्यक्षस्य विधयः वर्णिताः।

एकोनविंशतितमे अध्याये पौतवाध्यक्षस्य (मानोन्मानपरीक्षकस्य अधिकारिणः) विधयः, मूल्यनिर्धारणनियमाश्च प्रतिपादिताः। विंशतितमेऽध्याये मानाध्यक्षेण देशकालयोः मानं सम्यग् ज्ञातव्यम् इत्युक्त्वा विविधानि मानानि वर्णितानि। एकविंशतितम-द्वाविंशतितमाध्याययोः शुल्काध्यक्षेण (विक्रयकराधिकारिणा)

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्त्तव्यानि कार्याणि, कस्मिन् वस्तुनि कियद्वा शुल्कं विधातव्यमिति च विशदीकृतम्। सूत्राध्यक्षाध्याये (२३) विविधतन्तुवर्णनपूर्वकं तेषां मूल्यं, रज्ज्वादिसंबद्धाश्च विषयाः प्रतिपादिताः। एतत्पर्यवेक्षकस्य अधिकृतस्य नाम 'सूत्राध्यक्षः"। सीताध्यक्षाध्याये (२४) कृषि संबन्धिनी चर्चा कृता। सीताध्यक्षेण सर्वेषां वृक्षाणां सस्यादीनां च बीजानि संगृह्य रक्षितव्यानि। योग्येभ्यः दत्त्वा तेषां वापः कारयितव्यः। राज्याधिकारिभिः यस्यां भूमौ कृषिः कर्तुं न शक्यते तां भुवम् अन्येभ्यो दत्त्वा अर्धं सस्यस्य गृह्णीयात्। तटाकादिकं स्वयं निर्माय कृषिं प्रवर्तयन्तः राज्ञे पञ्चममंशं दद्युः। स्कन्धेन दूरात् जलमानीय कृतकृषिभिः चतुर्थोऽशो देयः। स्रोतोयन्त्रेण जलं वाहयित्वा कृतकृषिभिः तृतीयांशो देयः। नदी-सरस्-तटाक-कूपेभ्यः जलमानीय कृतकृषिभिः चतुर्थोऽशो देयः।

पञ्चविंशतितमेऽध्याये सुराध्यक्षकर्माणि विहितानि। सुराध्यक्षः सुरानिर्माणस्थानानि पर्यवेक्षेत। आवश्यकतानुसारं तेषु तेषु स्थानेषु सुरापणानि स्थापयेत्। तेभ्यः स्थानेभ्यः अन्यत्र सुरानिर्मातारः पणानां षट्शतेन दण्डनीयाः। सत्पुरुषा इति विदिताः जनाः चतुर्थांशं वा, अर्थकुंडुवं वा, एकं कुडुवं वा, प्रस्थं वा, अर्धप्रस्थं वा सुरायाः गृहं नेतुं शक्नुयुः। अन्यैः पुनः सुरा पानागारेष्वेव पेया। एषु स्थानेषु बहून् चोरान् ग्रहीतुं शक्येत। अतस्तेषां तत्र अभिज्ञाने निग्रहे च यत्नः कर्तव्यः। पानागारेषु बहूनि अपवरकाणि भवेयुः। तेषु च शयनासनादीनि सुगन्धमाल्योदकादीनि च स्थापनीयानि। अस्मिन् प्रसङ्गे कौटिल्येन अनेकविधानां मद्यानां वर्णनं कृतम्।

षड्विंशतितमेऽध्याये सूनाध्यक्षेण (मांसविक्रयशालापर्यवेक्षकाधिकारिणा) कर्त्तव्यानि मांसपरीक्षादिकार्याणि प्रतिपादितानि। निषिद्धारण्येषु वसतः पक्षिमृगादीन् ये घ्नन्ति ते तीक्ष्णेन दण्डेन दण्डनीयाः। वेश्याः, तत्पर्यवेक्षणादिकं च सप्तविंशतितमाध्यायस्य विषयः। अत्राधिकृतः गणिकाध्यक्षः। आवश्यकतानुसारेण राजा विविधवेषभाषादिप्रवीणाः नटनर्तकादीनां भार्याः प्रयुज्य शत्रून् स्ववशं नयेत्।

संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः॥ (२.२७)

Digitization by Arya Samaj Charitable Foundation, Chennai

नदीसमुद्रादिषु नौकासंचारयितृन् पर्यवेक्ष्य तेभ्यः शुल्कग्रहीतुः नावाध्यक्षस्य कर्माणि बोधयति कौटिल्यः अष्टाविंशतितमे अध्याये। एकोनत्रिंशत्तमादारभ्य त्रयस्त्रिंशत्तमाध्यायपर्यन्तं पञ्चनामध्ययानां क्रमेण 'गोध्यक्षः', 'अश्वाध्यक्षः', 'हस्त्यध्यक्षः', 'हस्त्यध्यक्षःहस्तिप्रचारश्च,' 'रथाध्यक्षः'-सेनापतिप्रचारश्च' इति नामानि। गो-अश्व-गज-रथसंबन्धिनाम् अधिकृतानां कर्माणि, गवादिजातिषु भेदाः, तेषां पोषणादिकं चैतेषु प्रतिपादितम्। चतुस्त्रिंशे अध्याये मुद्राध्यक्ष-विवीताध्यक्षयोः कर्माणि विहितानि। नगरं प्रविशतो वा नगराद् बहिर्गच्छतो वा माषमेकं गृहीत्वा मुद्राध्यक्षः तस्मै मुद्रां (pass) दद्यात्। मुद्रारहितः, असत्यमुद्राप्रदर्शकश्च दण्डार्हौ। यद्यसौ विदेशीयः तदा अधिकदण्डार्हः। मुद्रापरीक्षणं विवीताध्यक्षस्य कर्म। अटवीषु ये संचरन्ति तेषामप्यनेन पर्यवेक्षणं कार्यम्।

समाहर्तृप्रचाराख्ये पञ्चत्रिंशत्तमे अध्याये समाहर्तुः (Rovenue collector) विधयः निरूपिताः। सः स्वीयाधिकारगोचरं जनपदं चतुर्धा विभज्य तत्संबद्धान् सर्वान् विषयान् (धान्य-पशु-हिरण्य-करप्रभृतीन्) इदम् इयत् इति पुस्तकनिबद्धान् (Registered) कुर्यात्। तस्मादवरः गोपः नाम अधिकृतः पञ्च ग्रामान् वा, दश वा ग्रामान् पर्यवेक्षेत। ग्रामाणां सीमाः, कृष्टा भूमिः, अकृष्टा भूमिः, क्षेत्राणि, आरामाः, वनानि, गृहाणि, चैत्यानि, देवालयाः, सेतवः, श्मशानानि, सत्राणि, प्रपाः, पुण्यस्थानानि, अन्नक्षेत्राणि, मार्गाः इत्यादीनां सर्वेषामपि तत्तद्ग्रामसंबद्धानां विषयाणां सम्यग् ज्ञानं तस्य भवेत्। इयन्तः चातुर्वर्ण्यजनाः, इयन्तः पशवः, इयत् सुवर्णम्, इयन्तः विष्टयः च ग्रामेऽस्मिन् वर्तन्ते, इयान्करः लभ्यते इति तेन ज्ञातव्यम्। केषां का वृत्तिः, स्त्रियः कानि कर्माणि कुर्वन्ति, पुरुषाः कानि कुर्वन्ति, बालवृद्धादयः कानि कर्माणि कुर्वन्ति इत्याद्यपि स जानीयात्। जनपदस्य चतुर्थं भागं स्थानिकाख्यः अधिकारी पर्यवेक्षेत। अपराधिदण्डनाधिकारिणः प्रदेष्टृनामानः गोपानां, स्थानिकानां च कर्मणि साहाय्यं कुर्युः। विविधवेषधारिणां गूढचारिणां साहाय्येन ग्रामेषु कुत्र किं प्रचलति इति समाहर्ता अनिशं जानीयात्।

नगराध्यक्षः नागरिकः। तेन तदवराधिकारिभ्यां स्थानिकगोपाभ्यां च कर्तव्यानि कर्माणि षट्त्रिंशत्तमे अध्याये निरूपितानि। पाषण्डेभ्यः, पान्थेभ्यश्च

Digitization by Arya Samaj Charitable Foundation, Chennai

वासाय स्थानदानात् पूर्वं धर्मशालाधिकारी स्थानिकाय निवेदयेत्। शिल्पिभिः वणिग्भिश्च अन्येभ्यः स्वगृहेषु निवासः कल्पयितुं शक्येत। परन्तु ये अन्येषां वस्तुभिः वाणिज्यं कुर्वन्ति, ये वा देशकालविरुद्धया रीत्या वाणिज्यं कुर्वन्ति ते अधिकारिभ्यः निवेदनीयाः। मद्यमांसादिविक्रेतृभिः, अन्नविक्रेतृभिः, वेश्याभिश्च स्वपरिचितानां स्वगृहेषु वासः कल्पयितुं शक्यते। परन्तु अतिव्ययकर्तारः यदि केऽप्यागच्छन्ति ते अधिकृतेभ्यः निवेदनीयाः। एतादृशा नियमाः अनेकेऽस्मिन् अध्याये प्रतिपादिताः। गेहे दह्यमाने तत्रैव स्थित्वापि ये अग्निनिर्वापणे न प्रयतन्ते ते दण्डनीयाः। अग्निदस्य दण्डः वध एव। ये रथ्यासु पांसु प्रक्षिपन्ति, कलुषं जलं प्रवाहयन्ति, ये वा पुण्य- स्थानोदकस्थानादीनि मलमूत्राभ्यां कलुषीकुर्वन्ति ते दण्डनीयाः। मार्जाल-शुनक-नकुल-सर्पादीनां, गर्दभादीनां च मृतशरीराणि ये रथ्यासु प्रक्षिपन्ति, ये वा निर्णीतान्मार्गात् अन्येन मार्गेण शवं नयन्ति ते दण्डनीयाः। रात्रेः प्रारम्भे घटिकाषड्कानन्तरं, रात्रौ च घटिकाषट्कशिष्टायां, द्विवारं, राजप्रासादसमीपे तूर्यशब्दः क्रियते। तूर्यघोषद्वय-मध्यकाले, रात्रौ ये राजप्रासादसमीपे सञ्चरन्ति ते दण्डनीयाः। प्रतिदिनं नागरिकेण जल-स्थलमार्गाणाम्, भूमिच्छन्नमार्गाणाम्, प्राकारणाम्, गोपुरादीनां च गर्यवेक्षणं कर्तव्यम्। कांश्चित् बन्दिनः, तैः यत्किंचित् कर्म कारयित्वा मुञ्चेत्। सच्चरितान् बन्दिनोऽपि तदा तदा कारागारविमुक्तान् कुर्यात्।

तृतीयस्याधिकरणस्य **धर्मस्थीयम्** इति नाम। प्रथमेऽध्याये धर्मस्थानां त्रयाणाम् अमात्यानां कर्माणि निर्णीतानि। दशानां ग्रामाणां केन्द्रं 'संग्रहणम्'। ग्रामाणां शतचतुष्टयस्य केन्द्रस्य नाम 'द्रोणमुखम्'। अष्टशतसंख्यकानां ग्रामाणां केन्द्रस्य नाम 'स्थानीयम्'। जनपदसन्धि-(ग्रामसीमा) संग्रहण-द्रोणमुख-स्थानीयेषु धर्मस्थैः त्रिभिः अमात्यैः प्रजानां व्यवहाराः द्रष्टव्याः। व्यवहारेषु के वा ग्राह्याः के वा न ग्राह्याः इति प्रथमत एव निर्णेतव्यम्। वादिप्रतिवादिभ्याम् उक्तं सर्वमपि यथातथं पत्रारोपितं कर्तव्यम्। साक्षिणां परीक्षा कर्तव्या। असत्यवादिनः साक्षिणः दण्डनीयाः। विवाह-स्त्रीधनादीनि द्वितीयाध्यायस्य विषयः। मन्वादिधर्मशास्त्रोक्ताः अष्टविधाः ब्राह्म-प्राजापत्य-आर्ष-दैव-गान्धर्व-आसुर-राक्षस-पैशाचाख्याः विवाहाः उक्ताः। 'वृत्तिः',

Digitization by Arya Samaj Charitable Foundation, Chennai

'आबन्ध्यम्' चेति स्त्रीधनं द्विविधम्। श्वशुरादिभिः कल्पितं द्विसहस्रावरं धन वृत्तिः। अलंकाराः आबन्ध्यम्। इदमियदिति आबन्ध्यविषये नियमो नास्ति। मृतभर्त्री नारी यदा जीवनशेषं धर्मकर्मभिः यापयितुमिच्छति तदा तस्या धनं कियताचित् प्रीतिधनेन सह तस्यै दातव्यम्। एवं गृहीतधना सा नारी यदि कालान्तरे पुनः विवाहमभिलषति तदा तया पूर्वपतिबन्धुभ्यो गृहीतं धनं कुसीदपूर्वकं तेभ्यः प्रतिदातव्यम्। यदि कुटुम्बानुज्ञयैव तया पुनर्विवाहः क्रियते श्वशुरेण, प्रथमभर्त्रा च दत्तं धनं तस्यै विवाहकाले एव दातव्यम्। श्वशुरस्यानुज्ञां विना पुनरूढा चेत् तद्धनं न दातव्यम्। यद्ययं पुनर्विवाहः तस्या बन्धुभिरेव कृतः तदा तैरेव तस्यै धनं दातव्यम्। पुनरूढायाः नार्याः (प्रथम) भर्तुः रिक्थे नास्ति कोऽप्यधिकारः। यदि सा धर्मबुद्धिः पुनर्विवाहं न करोति तदा अस्या अधिकारः। यदि पुत्रवती स्त्री पुनः विवाहं करोति तस्या (स्त्री) धनं पुत्रं गच्छेत्। यदि सा पुत्रपोषणाद्यर्थमेव पुनर्विवाहे प्रवर्तते तदा तस्या धनं पुत्रेभ्यः निर्देष्टव्यम्। यदि काचिन्नारी बहुभ्यः पुरुषेभ्यः बहून् पुत्रान् लभते तदा यस्मात् पितुः यद्धनं प्राप्तं तत् तस्यैव पुत्राय, पुत्रेभ्यो वा दापयितव्यम्। पुत्रविहीना नारी पतिव्रताधर्मम् अनुसरन्ती यदि पुनः विवाहं न करोति तदा आमरणं श्वशुरादिनिकटे वसन्त्या स्वीयं धनं भोक्तुं शक्यते। अन्ते च तद्धनं दायादगामि। भर्तुः पूर्वमेव मृतायाः नार्याः धनं पुत्राः पुत्र्यश्च विभज्य गृह्णीयुः। पुत्राभावे तद्धनं पुत्रीणामेव। संतत्यभावे पुनः तद्धनं भर्ता लभते। विवाहसमये पित्रादिभिः नार्यै दत्तं धनं, यदि सा म्रियेत, तदा त एव ज्ञातयः गृह्णीयुः। एवं धनसंबद्धाः नैके विषयाः अत्र दृश्यन्ते। यदि भार्या वन्ध्या भवति तदा भर्त्रा अष्टौ वर्षाणि प्रतीक्षा कर्तव्या। यदि मृतशिशुं सूते दशवर्षाणि, यदि पुत्रीं सूते द्वादश वर्षाणि च प्रतीक्षेत। तदापि पुत्रानुत्पत्तौ द्वितीयां जायाम् उद्वहेत्। एतद्विरुद्धया रीत्या प्रवर्तमानः दण्डनीयः। यदि भर्ता नीचः, परदेशप्रवासी, राजद्रोहकरः, प्राणघातकः, पतितः, नपुंसको वा भवेत् तदा भार्या विवाहविच्छित्तिं कुर्यात्—

नीचत्वं (चो वा) परदेशं वा प्रस्थितो राजकिल्बिषी।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽपि वा पतिः ॥(३.२)

Digitization by Arya Samaj Charitable Foundation, Chennai

तृतीये अध्याये भार्याभर्त्रोः परस्परम् अव्यभिचारं विधाय व्यभिचारे विविधा दण्डाः विहिताः। द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति, षोडशवर्षश्च पुमान्—(३.३) तदारभ्य ताभ्यां राजशासनं यथावत् अनुसर्तव्यम्। चतुर्थाध्यायेऽपि परस्त्री-पुरुषसंसर्गवतां पुरुषस्त्रीणां विविधा दण्डाः प्रोक्ताः। भर्तुः दीर्घप्रवासे, नातिदीर्घप्रवासे च स्त्रिया कियन्तं कालं तस्य प्रतीक्षा कर्तव्या इति सविस्तरं निरूप्य प्रतीक्षाकालोत्तरं तया पुनर्विवाहः कर्तुं शक्य इति प्रतिपादितम्। ऋतुकालं वितथी-कृत्य पुत्रानुत्पादनं धर्मवध इति वदति कौटिल्यः (३-४)।

दायविभागः पञ्चमाध्यायस्य विषयः। पित्रोः जीवतोः, अथवा पितरि जीवति पुत्रस्य रिक्थे नाधिकारः। पित्रोः मरणानन्तरमेव पुत्रैः दायविभागः कर्तव्यः। षष्ठ-सप्तमाध्याययोरपि दायविभागप्रसङ्गे बहुविधेषु पुत्रेषु केन कियान् भागः लब्धव्यः इत्यादयो विषयाः विशदीकृताः।

वास्तुसंबद्धाः विवादाः अष्टमाध्यायस्य विषयः। गृह-क्षेत्र-आराम-सेतुबन्ध-तटाक-विभाजकस्थली-तीरादीनां 'वास्तु' इति नाम। एतत्संबद्धाः व्यवहाराः साम-न्तेन (ग्रामाधिकारिणा) अवेक्षणीयाः। वास्तुविक्रयविचारके नवमेऽध्याये वास्तु विक्रेतुमिच्छता प्रथमतः ग्रामाधिकारिणे, ज्ञातिभ्यः, धनिकाय (ऋणदात्रे च) निवेदनी-यम्। यदा ते क्रेतुं नाभिलषन्ति तदैव अन्येभ्यः विक्रेतव्यम् इति प्रतिपादितम्। सीमाविवादसंबन्धिनोऽपि अनेके विषयाः चर्चिताः। दशमेऽध्याये वास्तुविवादेषु विधेयानां धनदण्डानां चर्चा प्रवर्तिता। यदि कर्षकः ग्राममागत्य भुवं न कर्षति तदा ग्रामस्थैः तस्य धनदण्डो विधेयः। यदि कार्मिकः कर्म कर्तुं निराकरोति तस्य वेतनात् द्विगुणो दण्डः। सामूहिकपानभोजनादिभ्यः धनम् अददते द्विगुणो दण्डः। सार्वज-निकमनोरञ्जनार्थं क्रियमाणेषु नाट्यादिप्रदर्शनेषु यदि कोऽपि आत्मना दातव्यं धनं न ददाति तदा सकुटुम्बः सः तादृशविनोदानां दर्शनात् बहिष्कर्तव्यः। यदि निगूढं पश्यति शृणोति वा तदा द्विगुणो दण्डः। सार्वजनिकहितार्थं केनापि बोधितं कार्यं ग्रामस्थाः सर्वेऽपि कुर्युः। तथा अकुर्वतः द्वादशपणदण्डः। यदि सर्वेऽपि मिलित्वा तं (उपदेष्टारम्) प्रहरन्ति तदा ते प्रत्येकं द्विगुणेन दण्डेन दण्डनीयाः। यदि हन्युः

Digitization by Arya Samaj Charitable Foundation, Chennai

ततोप्यधिको दण्डः। "सर्वहितमेकस्य ब्रुवतः कुर्युराज्ञाम्। अकरणे द्वादशपणो दण्डः। तं चेत् संभूय हन्युः पृथगेषामपराधाद्विगुणो दण्डः। उपहन्तृषु विशिष्टः"। (३.१०)। देशजातिकुलसंघानामपि विषये अयमेव नियमः। देशहितप्रवृत्तानां राज्ञा सर्वथा साहाय्यं कर्तव्यम्।

राजा देशहितान् सेतून् कुर्वतां पथि संक्रमान्।
ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत्॥ (३.१०)

एकादशाध्याये ऋणदानादाननियमाः विषयः। पणानां शताय सपादपणः मासिकवृद्धितया देयः। वाणिज्यार्थं गृहीते ऋणे पञ्चपणवृद्धिः। अटवीषु वाणिज्यकर्तृभ्यः दशपणवृद्धिः ग्राह्या। समुद्रवणिग्भ्यः विंशतिपणवृद्धिः ग्राह्या। अतोऽधिकं ग्रहणे धनिकः (ऋणदाता), धारणिकः (ऋणग्रहीता), साक्षिणश्च दण्डनीयाः। दशवर्षापगमे कालदोषः। परन्तु अस्य केचिदपवादाः उक्ताः। यदि धनिकः बालः, वृद्धः, प्रवासी, रोगार्तो वा भवति तदा न कालदोषः। द्वादशाध्याये उपनिधि- (Deposit) आधि- (Pledged object) याचितक- (borrowed thing) अवक्रीतक- (taken on rent) निक्षेप- (thing given to some for protection) प्रभृतिव्यवहाराः विषयः। प्रायः शिल्पिनः अशुचयः। अतः तेषु दत्तः निक्षेपः अतीव श्रमेण पुनर्लभ्येत इति वदति कौटिल्यः—"अशुचयो हि कारवः। नैषां करणपूर्वो निक्षेपधर्मः"(३.१२)

त्रयोदशाध्यायस्य विषयः दासानां व्यवहारः। म्लेच्छानां दासीकरणे न दोषः। यदि आर्याः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रजातीयाः विक्रीयन्ते कुटुम्बिभिः ते विक्रेतारः दण्डनीयाः। "उदरदासवर्जमार्यप्राणमप्राप्तव्यवहारं शूद्रं विक्रयाधानं नयतः स्वजनस्य द्वादश पणो दण्डः, वैश्यं द्विगुणः, क्षत्रियं त्रिगुणः, ब्राह्मणं चतुर्गुणः"। (३.१३) देशोपद्रवादिषु कदाचित् तेषामपि दासता भवेत्। दासैः कानि कर्माणि कारयितव्यानि, कानि न कारयितव्यानि; तेषां विमोकः, तेषां धनम् इत्यादयो विषया अत्र विशदीकृताः। चतुर्दशाध्याये कर्मकराः, तेषां वेतनानि, तेषां कर्माणि, यजमान-याजकयोः व्यवहारः इत्यादयो विषयाः चर्चिताः।

Digitization by Arya Samaj Charitable Foundation, Chennai

विक्रीतक्रीतानुशयाख्ये पञ्चदशाध्याये विषयाः—विक्रीतं वस्तु क्रेत्रे अददत् विक्रेता, तद्वस्तु अगृह्णन् क्रेता उभावपि दण्ड्यावेव। कन्यागतान् गुप्तदोषान् अकथयित्वा विवाहयोजयितुः ९६ पणानां दण्डः। वरगतान् गुप्तदोषान् अकथयित्वा विवाहयोजयितुः द्विगुणो दण्डः। ब्राह्मण-क्षत्रिय-वैश्येषु संवृत्तस्य विवाहस्य परिवृत्तिर्नास्ति। प्रथमसंयोगानन्तरमपि शूद्रेषु विवाहभङ्गः कर्तुं शक्यते। संयोगसमये यदि केचित् लैङ्गिकाः दोषाः लक्ष्यन्ते तदा त्रैवर्णिकेष्वपि विवाहभङ्गः कर्तुं शक्यः। पुत्रोत्पत्त्यनन्तरं तु न शक्यम्। दत्तस्यानपाकर्म (दास्यामीत्युक्त्वा अदानम्), परस्वविक्रयः, स्वीये वस्तुनि अधिकारः इत्याद्याः षोडशाध्यायस्य विषयाः। दश वर्षाणि अन्याधीनं वस्तु तदीयमेव भवति। गृहादीनि अवक्रीतकानि वास्तूनि (Taken on rent) विंशतिवर्षानन्तरं भोक्तुरेव स्युः। बलात्कारेण कृतं लुण्ठनमारणादिकं, तद्दण्डाश्च सप्तदशाध्यायस्य विषयः। तादृशानां कार्याणां साहसमिति नाम। वाक्पारुष्य-दण्डपारुष्ययोः दण्डः अष्टादश-एकोनविंशतितमाध्याययोः विषयः। परेषां निन्दा वाक्पारुष्यम्। "शोभनाक्षिदन्त इति काणखञ्जादीनां स्तुतिनिन्दायां द्वादशपणो दण्डः" (३.१९)।

विंशतितमे अध्याये द्यूतगृहाणां पर्यवेक्षणम्, तत्र भवताम् विवादानां परिष्कारः इत्यादयो विषयाः प्रतिपादिताः। अस्मिन्नेवाध्याये 'प्रकीर्णकम्' इति नाम्ना अन्येऽपि केचिद्दण्डाः प्रतिपादिताः। व्यवहारेण आगतानां व्यवहारान् पर्यवेक्षमाणैः धर्मस्थैः (धर्माधिकारिभिः) ये वा देव-ब्राह्मण-तपस्वि-स्त्री-बाल-वृद्ध-व्याधिग्रस्त-अनाथादयः व्यवहारसत्त्वेऽपि व्यवहारस्थानम् आगन्तुं न शक्नुवन्ति तेषामपि व्यवहाराः स्वयमेव पर्यवेक्षणीयाः। नैवायं देशः, युक्तः कालो वा इत्यादि यत्किंचिदपदेशतया उक्त्वा तेषां व्यवहारस्य भङ्गं धर्मस्थाः न कुर्युः। उत्तमविद्यावतः, बुद्धिशालिनः, मानवतः, उत्तमवंशजान्, पण्डितान्, सत्कार्यकर्तॄंश्च ते सभाजयेयुः।

चतुर्थाधिकरणस्य नाम **कण्टकशोधनम्**। प्रजासु ये विविधान् क्लेशान् जनयन्ति तेषां तस्करादीनां निग्रहः कण्टकशोधनम्। त्रयः प्रदेष्टारः (commissioners), त्रयः अमात्याश्च कण्टकशोधनं कुर्युः। प्रथमेऽध्याये प्रजानां क्लेशकराः तन्तुवाय-रजक-सुवर्णकार-लोहकार-वैद्य-नट-नर्तकादयः वर्णिताः। रजकैः

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्येषां वस्त्राणि न धार्याणि । सर्वदा तैः मुद्ररचिन्हितानामेव वाससां धारणं कर्तव्यम् । अन्यथा ते दण्डनीयाः । वैद्यैः प्राणाबाधिकं (serious case) प्रथमत एव अधिकारिभ्यः निवेदनीयम् । तथा अकरणे, अयुक्तौषधदाने च ते दण्डनार्हाः । वणिगादयः अचोरनामधेयाः चोराः, तेभ्यः प्रजा रक्षेद्राजा—

एवं चोरानचोराख्यान् वणिक्कारुदकुशीलवान् ।
भिक्षुकान् कुहकांश्चान्यान् वारयेद्देशपीडनात् ॥ (४.१)

संस्थाध्यक्षाः (वाणिज्यसंस्थाधिकारिणः) यथा वणिजः शुद्धान्येव पण्यानि विक्रीणीयुः, न गृह्णीयुश्चाधिकं लाभं तथा पर्यवेक्षेरन् इति द्वितीयेऽध्याये प्रतिपादितम् । दैवकृतेभ्यः अष्टभ्यः महाभयेभ्यः जनपदरक्षणरीतयः तृतीयाध्याये वर्णिताः । अग्नि-उदक-व्याधि-दुर्भिक्ष-मूषक-क्रूरमृग-सर्प-राक्षसाः अष्टौ महाभयानि । एतेषां निवारणाय उपायान्तरैः साकं अथर्ववेदोक्तविधानान्यपि करणीयानि ।

विविधवेषगुप्तान् गूढचारिणः, अद्भुतानि कार्याणि कानिचित् कृत्वासिद्धव्यपदेशेन देशे संचरतः पुरुषांश्च प्रेषयित्वा प्रजाकण्टकभूतानाम् अधिकारिणां, वशीकरणविद्यया लोकवञ्चकानाम्, कूटमुद्रादिनिर्मातृणाम्, रसप्रयोगेन, अन्यघातकानां च निग्रहोपायाः चतुर्थपञ्चमाध्याययोः वर्णिताः । शङ्कनीयानामभिज्ञानम्, चोराणां, हृतधनस्य च अभिज्ञानमित्यादयो विषयाः षष्ठाध्याये प्रतिपादिताः । सप्तमाध्याये आशुमृतकपरीक्षा (Post-mortum), सम्यक् परीक्ष्याभिज्ञातानां चोराणां विविधा दण्डाश्च अष्टमाध्याये च निरूपिताः । कृतापराधः ब्राह्मणः शारीरदण्डेन न दण्डनीयः । पतितत्वचिन्हतया ललाटे तप्तलोहमुद्राः निक्षिप्य सः देशान्निष्कासनीयः । चौर्ये शुनकमुद्रा, मनुष्यमारणे कबन्धमुद्रा, गुरुभार्यागमने भगमुद्रा, सुरापाने मद्यध्वंजमुद्रा च कार्या । यदि देशात् न निष्कास्यते तदा तेन आकरेषु कर्म कारणीयम् । अप्रमत्तैः समाहर्तृभिः, प्रदेष्टृभिश्च तत्तत्कार्याध्यक्षाः तेषामधस्तनाः अधिकृताश्च यथा स्वीयमधिकारं प्रजापीडने नोपयुञ्जीरन् तथा पर्यवेक्षणं कर्तव्यमिति नवमाध्याये प्रतिपादितम् । केषुचित् चौर्यविशेषेषु ते चोराः तत्तदङ्गच्छेदेन दण्डनीया इति एकाङ्गवधनिष्क्रयाख्ये दशमेऽध्याये कथितम् । वध-अन्तःपुरदूषण-स्त्रीमानभङ्गादिषु अपराधेषु वध-अङ्गच्छेदादयो दण्डा विहिताः

Digitization by Arya Samaj Charitable Foundation, Chennai

एकादशद्वादशाध्याययोः । अपेयपाने अभक्ष्यभक्षणे च ब्राह्मणक्षत्रियादीनां निर्बन्धे, अन्यगृहप्रवेशे, निशीथे प्राकारमवप्लुत्य गृहे (स्वगृहेऽपि वा) प्रवेशे कुड्यशैथिल्याद्वा, रथचक्राणां विसंष्ठुलत्वाद्वा, कुड्यानां सम्यगनाच्छादनाद्वा अन्यमृतिहेतुत्वे, अन्येषु चैतादृशेष्वपराधेषु, अगम्यागमने च दातव्यानां विविधानां दण्डानां वर्णनं त्रयोदशाध्याये दृश्यते ।

पञ्चमाधिकरणस्य नाम **योगवृत्तम्** । स्वीयाः परे वा ये राज्योपघातिनः, प्रत्यक्षतः निरोद्धुमशक्याः तान् कपटोपायैः घातयेदिति प्रथमाध्याये उक्तम् । द्वितीयाध्याये कोशभरणोपायाः, तृतीयाध्याये तत्तद्भृत्यानां वेतनानि च प्रतिपादितानि । राजभृत्यै राज्ञो मानसीं वृत्तिमनुरुध्य प्रवर्तितव्यम् इति चतुर्थपञ्चमाध्यायोः सविस्तरं प्रतिपादितम् । मृतेऽपि राजनि स उदन्तः गोपनीयः । अर्हं राजकुमारं सिंहासने स्थापयित्वा सामन्तादयः यथा अनुकूलाः स्युः तथा कर्तव्यं मन्त्रिणा । राज्ञः पुत्राणामभावे अन्तर्नत्लीं राजभार्यां, अथवा राजपुत्रीं सिंहासने स्थापयेत् । अथवा राजकुमार्यां समानजातीयेन केनचित् पुंसा पुत्रं जनयित्वा तं राज्ये स्थापयेत् "कन्यायां समानजातीयकादपत्यमुत्पाद्य वाभिषिञ्चेत्" (५.६) इत्यादि षष्ठाध्याये प्रपञ्चितम् ।

षष्ठस्याधिकरणस्य नाम **मण्डलयोन्यधिकरणमिति** । प्रथमाध्याये स्वामी, (राजा) अमात्यः, जनपदम्, दुर्गम्, कोशः, सैन्यम्, मित्रम् इति राज्यस्य षट्प्रकृतयः, तेषां लक्षणानि च प्रतिपादितानि । द्वितीयाध्याये योगक्षेमौ शमव्यायामाधीनौ । तेषु तेषु कर्मसु योग्यानां तत्तदधिकारिणां नियोगः व्यायामः । तत्फलमनुभोक्तुं युक्तायाः स्थितेः उत्पादनं शमः । एतौ च षाड्गुण्याधीनौ । नयः अपनयश्च मानवाधीनौ । अयः, अनयश्च दैवाधीनौ । आभ्यां दैवमानुषाभ्यामेव लोकयात्रा प्रवर्तते । दैवं अदृष्टं सत् कर्माणि करोति । दैवात् यदीष्टं फलं लभ्यते सः अयः । यदि अनिष्टं फलं लभ्यते सः अनयः । मानुषं प्रत्यक्षतः कर्म करोति । मानुषात् योगक्षेमलाभः नयः; तयोः विधातः अपनयः । दैवविषये अस्माभिः न किमपि कर्तुं शक्यते । अतः मानुषविषय एव जागरूकेण भवितव्यं सर्वेणापि । आत्मसंपन्नः, द्रव्यसंपन्नः, प्रकृतिसंपन्नः, नीतिमार्गगामी च राजा 'विजिगीषुः' । तस्य राज्यस्य चतसृषु सीमासु ये भवन्ति राजानः ते 'अरिप्रकृतिः' । तेषां राज्येभ्यः परस्तात् ये वर्तन्ते ते राजानः

Digitization by Arya Samaj Charitable Foundation, Chennai

'मित्रप्रकृतिः'। एवम् आत्मनः सीमायां वर्तमानः 'अरिः'; तस्य परस्तात् वर्तमानः राजा 'मित्रम्'। मित्रराज्यस्य परस्तात् वर्तमानः 'अरिमित्रम्'। तस्यापि परस्ताद्वर्तमानः 'मित्रमित्रम्'। ततोऽपि परस्ताद्वर्तमानः 'अरिमित्रमित्रम्'। एवं विजिगीषोः राज्ञः पुरः पञ्चविधाः राजानः भवन्ति। एवमेव पश्चात् प्रथमतःपार्ष्णिग्राहः, ततः पश्चात् आक्रन्दः, ततः पश्चात् पार्ष्णिग्राहासारः, ततः पश्चात् आक्रन्दासारश्च भवन्ति। **एवं** विजीगीषुसहितानां दशानां राज्ञां 'राजमण्डलम्' इति नाम। एवं सहजशत्रवः, कृत्रिमशत्रवः, सहजमित्राणि, कृत्रिममित्राणीत्यादयो बहवो भेदाः निरूपिताः।

सप्तममधिकरणं **षाड्गुण्याधिकरणम्**। संधिविग्रह-आसन-यान-संश्रय-द्वैधीभावानां षाड्गुण्यम् इति नाम। कैश्चित् समयैः (Conditions) द्वयोः राज्ञोः परस्परसंबन्धकल्पनं 'संधिः'। अपकृतिः 'विग्रहः'। उपेक्षा 'आसनम्'। युद्धयात्रा 'यानम्'। स्वात्मार्पणं 'संश्रयः'। संधिविग्रहयोर्द्वयोरपि प्रवर्तने 'द्वैधीभावः'। सप्ताध्यायात्मके सप्तमेऽधिकरणे राजमण्डलगतैः राजभिः सह राज्ञा कथं प्रवर्तितव्यम्; षाड्गुण्यस्य कदा, कथं प्रयोगः कर्त्तव्य इत्यादि सविस्तरं वर्णितम्। आवश्यकतानुसारेण कूटयुद्धमपि करणीयम् इति वदति कौटिल्यः।

अष्टमाधिकरणस्य **व्यसनाधिकारिकम्** इति नाम। पूर्वोक्तानां प्रकृतीनां संभाव्यानि व्यसनानि तत्प्रतीकाराश्च प्रथमाध्याये निरूपिताः। राज्ञः, राज्यस्य च व्यसनानि द्वितीयाध्याये प्रतिपादितानि। आभ्यन्तरकोपः, बाह्यकोपः चेति कोपो द्विविधः। स्वराज्यप्रजाकृतोपप्लवरूपः आभ्यन्तरकोपः अतीव विपत्करः। तस्मिन् काले 'द्वैराज्य'-'वैराज्य'-प्रभृतयः राज्यपालनारीतयः आसन्। एकस्यैव राज्यस्य यदि द्वौ राजानौ पालकौ तत् द्वैराज्यम्। राज्ञः अभावः; प्रजापालनमेव चेत् तत् वैराज्यम्। वैराज्यापेक्षया द्वैराज्यमपि साधु इति मन्यते कौटिल्यः। तृतीयाध्याये पुरुषाणां व्यसनानि वर्णितानि। क्रोधात्—वाक्पारुष्यम्, अर्थदूषणम् (धनविषये अन्याय्या प्रवृत्तिः) दण्डपारुष्यञ्चेति व्यसनानि, कामात्—मृगया, द्यूतम्, स्त्रियः, पानम् इति व्यसनानि च भवन्ति।

चतुर्थाध्यायः—दैवप्रातिकूल्यात् अग्निपीडादयः आपदः संभवन्ति। उन्नताधिकृत-क्षुद्राधिकृतेषु क्षुद्रेषु आपद्गतेष्वपि न महती हानिः; यतः तादृशाः बहवो

Digitization by Arya Samaj Charitable Foundation, Chennai

लभ्येरन्। उन्नताधिकृतानां रक्षणे जागरूकेण राज्ञा भवितव्यम्। यतः सहस्रे एक एव तादृशः लभ्यते। देशविहार-(आनन्दविलासादिभिः प्रजानां विनोदः) राजविहारयोः राजविहारेण देशस्य महती विनष्टिः जायते। धनव्ययकरेऽपि देशविहारे लब्धमनोविश्रान्तयः प्रजाः अधिकं कर्म कर्तुं शक्नुयुः इत्यादयो बहवो विषयाः अध्यायेऽस्मिन् प्रतिपादिताः। सैन्यव्यसनम् (सैन्यस्य द्वेषः), मित्रव्यसनं (मित्रद्वेषः) च यथा न भवेत् तथा जागरूकेण भवितव्यं राज्ञा इति पञ्चमाध्याये प्रतिपादितम्।

नवमाधिकरणस्य नाम **अभियास्यत्कर्म**। शत्रुमभियास्यता विजिगीषुणा प्रथमतः पर्यालोचनीयाः नैके विषयाः अस्मिन्नधिकरणे प्रतिपादिताः। अत्रत्येषु नवसु अध्यायेषु प्रसङ्गवशात् अन्येऽपि केचन प्रधानाः विषयाः प्रतिपादिताः। प्रभावापेक्षया (सैन्यादिबलापेक्षया) मन्त्रशक्तिः बलीयसी। हिमवन्नगात् आदक्षिणसमुद्रं विस्तृतः, पूर्वपश्चिमयोः शतयोजनपरिमाणश्च देशः चक्रवर्तिक्षेत्रम्। तस्याखिलस्य भूमण्डलस्याधिपतिः चक्रवर्ती इति कौटिल्यः अवदत् प्रथमाध्याये।

द्वितीयाध्यायः—मूलबल-भृतकबल-श्रेणीबल-मित्रबल-शत्रुबल-(जितात् शत्रोः गृहीतं सैन्यम्) अटवीबलानि सन्नद्धानि कृत्वा विजिगीषुः युद्धार्थं प्रतिष्ठेत। तृतीयाध्यायः—विजिगीषुः आत्मनः राज्यं विहाय गमनानन्तरं राजधान्यां संभावितस्य प्रकृतिकोपस्य, अन्येषां उपद्रवाणां प्रतीकारं कृत्वा नगरात् निर्गच्छेत्। "सूचीमुखा ह्यनर्थाः इति लोकप्रवादः" (१.३)। अतः अल्पोऽपि विषयः नोपेक्षणीयः। चतुर्थाध्यायः—लाभालाभौ सम्यगालोच्य यदि लाभो भवेदिति विश्वासः तदा विना कामपि शङ्कां पुरो यायात्। प्रसङ्गेऽस्मिन् कौटिल्यः लाभविघ्नान् एवं निरदिशत्—"लाभविघ्नाः—कामः, कोपः, साध्वसम्, कारुण्यम्, ह्रीः, अनार्यभावः (विश्वासघातकत्वम्), मानः, सानुक्रोशता, परलोकापेक्षा, दाम्भिकत्वम्, अत्याशित्वम्, दैन्यम्, असूया, हस्तगतावमानः, दौरात्मित्कम्, अविश्वासः, भयम्, अनिकारः, शीतोष्णवर्षाणामाक्षम्यम्, मङ्गलतिथिनक्षत्रत्वमिति"(९.४)।

नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते।
अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नाधनाः प्राप्नुवन्त्यर्थान् नरा यत्नशतैरपि।
अर्थैरर्थाः प्रबध्यन्ते गजाः प्रतिगजैरिव॥ (९.४)

सन्ध्यादीनाम् अयथावत् प्रयोगः आपदाम् मूलम्। अतः तेषां प्रयोगे राज्ञा अप्रमत्तेन भवितव्यम् इति पञ्चमाध्याये प्रतिपादितम्। राजद्रोहिभ्यः, शत्रुभ्यश्च संभाव्याः आपदः, तत्प्रतीकारः, अर्थानर्थसंशयसंबद्धाः आपदः तत्प्रतीकारश्च षष्ठसप्तमाध्याययोः विषयः।

दशमाधिकरणस्य नाम **संग्रामिकाधिकरणम्**। युद्धार्थं सेनानिवेशनम्, पर-सेनास्कन्दनम्, सैन्येन सह पश्चात् वैद्यानां, सैनिकविनोदार्थं स्त्रीणाम्, इतरवस्तूनां च नयनम्, चतुरङ्गबलनिवेशः, युद्धरङ्गे राज्ञः स्थानम्, विविधव्यूहरचना च अस्मिन्नधिकरणे सविस्तरं वर्णिताः।

द्वादशस्याधिकरणस्य नाम **अबलीयसाधिकरणम्**। दुर्बलस्य बलवद्वशीभावे मतभेदाः प्रदर्शिताः अस्मिन्नधिकरणे। शत्रुणा सह संधिं कृत्वा दुर्बलेन युक्तस्य कालस्य प्रतीक्षा कर्त्तव्या। अन्येन केनचित् बलवता स्वशत्रोः शत्रुणा संधिं कृत्वा तत्साहाय्येन स्वशत्रुं नाशयेत्। गूढं शत्रुराज्ये प्रविश्य शस्त्राग्निरस- (Poisnous chemicals) प्रयोगैः शत्रोः राज्ये विप्लवोत्पादनोपायाः अस्याधिकरणस्य चतुर्थाध्याये प्रतिपादिताः। शस्त्रविषप्रयोगादिभिः कूटोपायैः शत्रुराजमारणविधानम्, देवालयादिस्थस्य तस्य वधः इत्यादयो विषयाः पञ्चमाध्याये प्रतिपादिताः।

त्रयोदशाधिकरणस्य नाम **दुर्गलम्भोपायः**। अनेकवेषधराणां नैकविधरूपाणां गूढचारिणाम्, आत्मानं चतुःशतवर्षान् व्यपदिशतां शिष्यमण्डलीपरिवृतानां जटिलानां योगिनां च शत्रुदुर्गान्तः प्रवेशनम्, श्मशानवृक्षेषु निलीनैः पिशाचादिवत् क्रोशद्भिः पुरुषैः "अस्माकं एतादृश्यः पूजाः कर्त्तव्याः, तादृश्यः कर्त्तव्याः, अन्यथा राज्यमेव ग्रसिष्यामः" इत्युच्चैः शब्दापनम्, वीवधासारनिरोधः इत्यादयः दुर्गाक्रमणरीतयः वर्णिताः अस्मिन् अधिकरणे।

चतुर्दशाधिकरणस्य नाम **औपनिषदिकम्**। चातुर्वर्ण्यस्य रक्षार्थं राजा अधार्मिकेषु इमाम् औपनिषदिकप्रक्रियां प्रयुञ्जीतेति उपदिशति कौटिल्यः—"चातु-

Digitization by Arya Samaj Charitable Foundation, Chennai

वर्ण्यरक्षार्थमौपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत" (१४.१)। मण्डूकानाम्, सर्पाणाम्, मूषकादीनां च मृतशरीरैः विविधपदार्थान्तरयोजनेन विविधरोगहेतूनां, प्राणापनेतृणां विषाणां निर्माणं तत्प्रयोगाश्च प्रथमद्वितीयतृतीयाध्यायेषु वर्णिताः। राजा एतैः शत्रून् विनाश्य स्वजनं रक्षेत्—

मन्त्रभैषज्यसंयुक्ता योगमायाकृताश्च ये।
उपहन्यादमित्रांस्तैः स्वजनं चाभिपालयेत्॥ (१४.३)

चतुर्थाध्याये विषाणामेतेषां प्रतीकाराश्च केचित्प्रतिपादिताः।

अन्तिमस्य पञ्चदशस्याधिकरणस्य नाम **तन्त्रयुक्तिः**। अस्य प्रथमेऽध्याये अर्थशास्त्रविषयाः, तत्प्रतिपादनरीतिश्च संक्षिप्य प्रदर्शिताः। अस्य प्रारम्भे—"मनुष्याणां वृत्तिरर्थः। मनुष्यवती भूमिरित्यर्थः। तस्याः पृथिव्याः लाभपालनोपायः शास्त्रमर्थशास्त्रम्" (१५-१) इति अर्थशास्त्रस्वरूपं वर्णितं कौटिल्येन। शास्त्रप्रयोजनं, शास्त्रकर्तुर्नाम, अस्य शास्त्रस्य वैशिष्ट्यं च एवं प्रतिपादितम् आचार्येण कौटिल्येन—

धर्ममर्थं च कामं च प्रवर्तयति पाति च।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च॥

येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्॥

दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च॥ (१५.१)

एतादृशस्यात्यद्भुतस्यार्थशास्त्रस्य प्रणेता महामेधासंपन्नः तत्रभवान् **कौटिल्यः** न केवलं रीति-(Theory) मात्रे, शास्त्रप्रयोगेऽपि नितरां निपुणः कार्यदक्षश्च। अत एवास्य अर्थशास्त्रस्य एतादृशं वैशिष्ट्यम्। वर्गसेनानिवेशयुद्धविधानादीन् विना प्रायः सर्वेऽपि अर्थशास्त्रप्रतिपादिताः विषयाः अधुनाप्याचरणयोग्या एव। भविष्यत्कालेऽपि तेषामुपयोगिता अप्रतिहतैव भवेत्। तादृशमहोन्नतवैभवोपेतं नन्दराज्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

समूलमुन्मूल्य, मौर्यसाम्राज्यं च स्थापयित्वा, प्रधानमन्त्रिपदमलंकृत्य सुचिरं कृतराज्यपालनस्यायं ग्रन्थः त्रैकालिकं वैशिष्ट्यं भजतीति नास्त्यत्र आश्चर्यलेशोऽपि।

कौटिल्यः, अरिस्टोटलश्च समकालिकौ। महाविजेतुः किल **अलेग्जाण्डरस्य** गुरुः **अरिस्टोटलः**। अयं च कौटिल्यः मौर्यवंशीयप्रथमचक्रवर्तिनः **चन्द्रगुप्तस्य** गुरुः, राज्यस्थापकः, महामन्त्री च। **कौटिल्यस्य अरिस्टोटलस्य** च भावेषु केषुचित् साम्यमस्तीत्येतत् परिशीलनार्हम्।

प्लेटोपण्डितस्य शिष्येण **अरिस्टोटलेन** क्रिस्तोः पूर्वम् **अथेन्स**नगरे विद्यालयमेकं स्थापयित्वा, तत्रैव भिन्नेषु कालेषु **राजनीतिः** (Politics) इति नाम्ना ग्रन्थपञ्चकं निर्मितम्। "मानवानां प्रातिस्विकजीवनेष्वपि राजनीतेः प्रभावः प्रसरति। सर्वाण्यपि शास्त्रान्तराणि, कलादयश्च राजनीतिमेवानुसृत्य प्रवर्तन्ते" इति **अरिस्टोटलेन** प्रतिपादितम्। दण्डनीतिरेव सर्वेषां शास्त्राणां मूलमिति **कौटिल्येन** सुदृढं प्रतिपादितम्। "यथाकथंचित् परिपालनमेव न राजनीतेः प्रधानं गम्यम्, समाजे उत्तमानां प्रवृत्तीनां नैतिकतायाश्च स्थापनमेवास्याः प्रधानं लक्ष्यम्" इति प्रत्यपादि **अरिष्टोटलेन**। अरिस्टोटलेनाविष्कृतस्यास्य मतस्य "धर्ममवलम्ब्य अर्थकामयोः पोषणं संरक्षणं च राज्ञः प्रधानं कर्तव्यम्" इति कौटिल्येन प्रतिपादितेन मतेन महत् साम्यं दृश्यते।

"अत्युत्तमं राज्याङ्गविधानमवलम्ब्यैव राज्यस्य पालनं कर्तव्यम्। अधिकृतानां कार्यनिर्वहणदक्षतामात्रेण न किमपि प्रयोजनम्। तैः सद्गुणवद्भिरपि भाव्यम्। पालकानां सुस्थिरतायामेव एतत् संपादयितुं शक्येत" इत्यभिप्रैति **अरिस्टोटलः**।

परितो विद्यमानानां संघराज्यानां कांश्चित् दोषान् दौर्बल्यं च जानता कौटिल्येन "यदा एकः पालकः सर्वाधिकारी भवति तदैव राज्यं सुस्थिरं योगक्षेमान्वितं च भवेत्" इति प्रतिपादितम्। गणतन्त्रराज्यानधिकृत्य लिखता कौटिल्येनोक्तम्— "पालकेषु यावदैकमत्यं वर्तेत तावत् गणतन्त्रराज्यानि सुदृढान्येव स्युः। परन्तु एतेषां प्रायः दुर्बलतैव संभाव्यते। यतः पालकेषु न कोऽपि उत्तरदायित्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

(Responsibility) वहति" इति। पालितापेक्षया पालकानेव प्रधानतयोद्दिश्य विरचितमिदम् अर्थशास्त्रम्। प्रजासु यथा मात्स्यन्यायः न प्रसरेत् यथा च सर्वा अपि प्रजाः नियमबद्धं, सुखसन्तोषसमृद्धं च जीवनविधानमनुसरेयुः तथा राज्ञा पालनं कर्तव्यम्। तदेवास्य परमो धर्मः इति कौटिल्यस्य सुदृढं मतमिति प्रतीयते।

क्रिस्तोः पूर्वं ६००-३२३ वर्षेषु भारते स्वपालनाधिकारवतां बहूनां संघ-राज्यानां (अथवा राजसंघानां) प्राचुर्यमासीत्। एषां राज्यानां तदात्वे **ग्रीस्-इटली-देशेषु** लब्धस्थितिभिः (संघ) नगरराज्यैः सुमहत् साम्यं दृश्यते। भारतदेशे तत्रथ-मतया प्रजाप्रभुतायाः स्थापने कृतानां यत्नानाम् एतानि राज्यानि चिन्हभूतानि।

सिन्धुनदीतीरसमीपे **अग्रश्रेणयः, मुचिकर्णिकाः अम्बिस्तवः, वसताः** इत्याद्याः गणतन्त्रपालननिर्वाहकाः संघाः (Tribes) आसन्। एवं पश्चिमभागे **काम्भोजाः, कटवः, सोभूताः, यौधेयाः, सिबयः, मालवाः, क्षुद्रकाः** इत्याद्यानाम् अतीव शूराणां जनानां संघाः आसन्। **कुकुराः, कुडाः, पाञ्चालाश्**चेति गणराज्यानि, ततः पूर्वं **वृष्णय**श्च आसन्निति कौटिल्येन सुस्पष्टमुक्तम्। एवं तस्यैव काले, अद्यत्व-**बेगांल्-बीहार**देशभूमिषु **साकय-कोलूल-मल्ल-भग्ग-मोरया**द्यानि गणराज्यान्यासन्। एषां संघराज्यानां पालनम् अत्यधिकसंख्याकसभ्यान्विताभिः सभाभिः क्रियते स्म। **वृजिक**संघे ७७०७ राजानः (सभ्याः) आसन्। **शक**संघे ५०० सभ्याः, **यौधेय**संघे ५००० सभ्याः, **अंबस्त**संघे वयोवृद्धाश्च सभ्याः आसन्। एतैरेव राज्यपालनं क्रियते स्म। **ग्रीस**देशीयनगरराज्येष्विव (city states) एतेषु संघराज्येष्वपि निर्णेयविषयाणां प्रवेशने, मतदाने विधेयकनिर्णयादिषु अतीव क्लिष्टाः नियमाः आसन्। राजचयनन्यायव्यस्थादिविषयेषु एतेषु अनुसृताभिः पद्ध-तिभिः ग्रीस्देशगतपद्धतीनां साम्यमासीत्। **ग्रीस्**देशे **स्पार्टा**गणतन्त्रराज्ये किल द्वौ राजानौ आस्ताम्। भारतेऽपि केषुचिद्राज्येषु द्वैराज्यमासीदिति कौटिल्येन स्पष्टीकृ-तम्। प्रजानां अधिकतया स्वातन्त्र्यमासीत्। परंतु अचिरेणैव कालेन आन्त-रङ्गिकभावभेदजनितेन द्वेषेण पालकानां स्वार्थपरतासूयादिदोषैश्च, ग्रीस्देशीयनगरराज्यवत् भारतदेशस्थानि संघराज्यान्यपि दुर्बलान्यासन्। **बौद्ध-जैन-भागवतादिमतानां** प्रचारश्च समाजे नैकान् भेदान् ससर्ज। जनाः आत्मनः

Digitization by Arya Samaj Charitable Foundation, Chennai

गृहेभ्यः, समाजाच्च दूरीभवन्तः कस्याप्यज्ञातलोकस्य अन्वेषणे प्रावर्तन्त। तेन च संघेषु ऐकमत्यं, बलं च क्षीणमभवत्। संघराज्यानि सुसंहतानि, बलीयांसि च भवन्तीति अरिस्टाटलवत् कौटिल्योऽप्यचिन्तयत्—"संघा हि संहतत्वादधृष्याः परेषाम्" (XI.I) "चतुरः राजा संघयोर्मध्ये विद्वेषं कल्पयित्वा तौ दुर्बलौ कुर्यात्। यदि संघराज्यानि बलवन्ति तदा सामदानादिभिः राजा तानि वशीकृत्य तेषां साहाय्यं लभेत" इति च उपदिशति कौटिल्यः। परं तु "राजदण्डभयाभावे यथा पुरुषः स्वकर्त्तव्यानि कर्माणि यथावत् न करोति तथैव, सर्वथा कस्यचित् प्रभोः आज्ञा पालनीया इति नियमस्याभावे संघा अपि स्वकर्तव्यविमुखाः दुर्बलाश्च भवन्ति। अतः ऐकराज्यमेव श्रेयः" इत्यभिप्रैति कौटिल्यः।

अर्थशास्त्रादिषु विहितानां राजधर्माणाम्, अनुशीलनेन इदं ज्ञायते राजापि वेतनं दत्त्वा तत्तत्कर्मनियुक्तैः अधिकारिभिः तुल्यः, तद्वदेव अस्यापि प्रजासेवनमेव प्रधानं कर्त्तव्यम् इति। तेन न कदापि निरङ्कुशा प्रवृत्तिः अनुसर्तुं शक्यते। राजकुटुम्बसंबद्धेभ्यः दातव्यं वेतनमपि निर्णीतं कौटिल्येन। युवराजस्य, राजमातुः, राजमहिष्याश्च सांवत्सरिकं वेतनम् ४८००० इति निर्णीतम्। एवमेवान्येषामपि राजकुटुम्बसंबद्धानां यथार्हं वेतनस्य निर्णयः कृतः पञ्चमाधिकरणे। राजा नाममात्रेणैव स्वामी। दण्ड्यदण्डन एव तस्याधिकाराः सर्वेऽपि परिमिताः दृश्यन्ते। अमात्यादिमतानुसरणम्, प्रजाक्षेमदृष्टिः, धर्मबद्धता इत्यादयः प्रतिबन्धाः प्रतिपदम् उपक्षिप्ताः दृश्यन्ते। अतः प्रजाश्रेयस्तत्परेण राज्ञा सर्वथा त्रयीधर्मः रक्षणीय इति कौटिलीयस्यार्थशास्त्रस्य सारः।

जैन-बौद्धयोराविर्भावादनन्तरं एकद्विशताब्द्याः अर्वागेव कौटिल्यः प्रादुरभवत्। तस्य कालेऽपि वैदिककर्मकलापस्य सर्वत्रापि प्रचुरः प्रचारः आसीत्। अग्निष्टोम-मध्यमोपसद-अहर्गण-बृहस्पतिसवन-राजसूयादीनां निर्देशः अर्थशास्त्रे दृश्यते। अथर्वप्रोक्तानां अभिचारकर्मणामपि विस्तृतः प्रचारः प्रयोगश्चासीत्। देशोपद्रवशमनार्थम्—अग्नि-यम-वरुण-अश्विनीदेवता-वैश्रवण-जयन्तानां पूजा कर्त्तव्या इत्यादिशति कौटिल्यः। दुर्गेषु वैश्रवणः, अपराजितः, दुर्गा, अप्रतिहतः, शिवः, विष्णुः, अन्याश्च देवताः स्थापनीयाः पूजनीयाश्च। बौद्धोपदिष्टैः अहिंसासंन्यासा-

Digitization by Arya Samaj Charitable Foundation, Chennai

दिभिः देशस्य कियद्वा दौर्बल्यं जातमिति अभिजानानेषु सर्वप्रथमः कौटिल्यः। संन्यासग्रहणापेक्षया देशरक्षणार्थं गृहस्थजीवनमेव श्रेयः इति असौ वदति। ये वा स्वकुटुम्बजीवनायावश्यकं कुटुम्बधनगेहादिकमनुपकल्प्य सन्यस्यन्ति, ये च वा स्त्रियः सन्यासाय प्रोत्साहयन्ति ते दण्ड्याः इति च असौ शास्ति। यदि संन्यासिनः ग्रामे वसेयुः तदा ग्रामीणा अपि अकर्मण्या भवेयुरिति भिया संन्यासिनां ग्रामवासो निषिद्धः कौटिल्येन।

कौटिल्यः माकियवेल्लि सदृशः इत्युच्यते प्रायः कैश्चित्। १४९४ तमे वर्षे **फ्रान्स**देशेन कृतात् **इटली**देशाक्रमणयत्नात् प्रभृति **फ्लारेन्स्** बहूनां क्लेशानां निलयः आसीत्। पश्चात् विंशतिवर्षान्तरं तस्य नगरराज्यस्य गणराज्यत्वेन परिवर्तनमभवत्। पुनः **फ्रान्स**देशेन कृतया समरयात्रया **फ्लारेन्स**गणराज्यस्य पालनादिकम् अस्तव्यस्तमासीत्। साक्षादेतत्सर्वं पश्यतः धीशालिनः **माकियवेल्लेः** मानसिकी स्थितिः कीदृशी वा भवेदित्यस्माभिरभ्यूहितुं शक्यते। तन्मतानुसारेण "जगतोऽस्य स्थितिः सुष्ठु भवेदिति न काप्याशा अस्ति। इतोधिकतया भ्रष्टापि न भवेच्चेत् न भवतु नाम। सौष्ठवस्य पुनः आशा नास्ति। सर्वदापि इयम् इत्थमेव भवेत्। एकदा वृत्तं सत् असद्वा लोकचरितं पुनः पुनः आवर्तत एव। मानवः सर्वदापि स्वार्थमात्राभिलाषी। विना सामाजिकश्रेयःकामनां स सर्वदा स्वलाभायैव प्रयतते। मानवः कृतघ्नः, वञ्चकः, चपलचित्तः, भीरुः, दुराशापरः, केवलम् आवश्यकतानुसारेण साधुतां प्रदर्शयति। अतः मानवः राज्ञा भाययित्वैव परिपालनीयः। तस्य हृदये प्रेमभावमुत्पाद्य पालयिष्याम इति चिन्ता पानीयार्थं मरुमरीचिकानुधावनमेव"। एतादृशः निराशावादः **माकियवेल्लिना** रचिते **प्रिन्स्** इति ग्रन्थे दृश्यते। संपूर्णम् आधिपत्यं प्राप्तुं साधनतया यः कोऽप्युपायः अनुसरणीयः इति अस्य सिद्धान्तः।

सम्यक् अनुशीलनेन ज्ञातुं शक्यते **कौटिल्य-माकियवेल्लयोर्मध्ये** न किमपि सादृश्यमिति। दण्डस्य प्राधान्यमभिदधतापि कौटिल्येन अपराधादधिकः दण्डः निषिध्यते। धर्मार्थकामानां सममेव प्राधान्यमुपकल्प्य राज्ये शान्तिपरिरक्षणमेव राज्ञः प्रधानं कर्तव्यमित्युपदिशति कौटिल्यः। शान्तिसाधनरूपमिदमुत्तमं कार्यं केवलं प्रजासु भयोत्पादनेन न सम्पादयितुं शक्यते। स्नेहश्रद्धापूर्वकेण प्रजानां

Digitization by Arya Samaj Charitable Foundation, Chennai

सहकारेणैवेदं साध्यं भवति। वर्णधर्म-आश्रमधर्माणां परिरक्षणेन समाजश्रेयः संपाद्यते इति विश्वसिति कौटिल्यः।

यथा सांघिकाया अभिवृद्धेः वर्णधर्मो हेतुः तथा आश्रमधर्मः वैयक्तिकाभिवृद्धेरिति तस्मिन् काले विश्वासः आसीत् जनानाम्। वर्णधर्मः जन्मतः सिद्धः इति वादो यदि दूरे स्थाप्यते (वैदिके काले तथैवासीदिति किल केषांचिन्मतम्) स अद्यापि प्रयोजनकर एव भवेदिति केचिदाशेरते। सत्यप्येतादृशे महति भेदे कौटिल्यस्य माकियवेल्लिना तोलनम् अचिन्तितरमणीयम्। **फ्लारेन्स्**-नगरराज्यव्यवस्थायाः तथा विशीर्णतां दृष्टवतो माकियवेल्लैः मनसि यथा काचित् परिवृत्तिरासीत् तथैव तस्मिन् काले केषांचित् संघराज्यगणराज्यानां शिथिलशिथिलां व्यवस्थां प्रत्यक्षतः पश्यन् कौटिल्योऽपि सुदृढेन विश्वासेन एकराजराज्यं समर्थयामासेति तावदभ्यूहितुं शक्यते। एतावदेव तयोः साम्यम्। न केवलं **कौटिल्य-मायकवेल्लिनोः**, कौटिल्यस्य अन्यदेशीयराजनीतिनिपुणानामपि च मध्ये एतादृशे साम्यवैषम्ये प्रदर्शयितुं शक्येते।

कौटिल्यात् वर्षाणां सार्धद्विसहस्रादनन्तरं दृष्टनैकपरिवर्तने काले वसद्भिरस्माभिः कौटिल्योक्तेषु केचिदंशाः अभ्युपगन्तुं नैव शक्येरन्। अथापि सर्वदापि प्रमाणतया, प्रयोगयोग्यतया च दृश्याः अनेके विषयाः वर्तन्त एव। कौटिल्यस्य उत्तमराजनीतिप्रावीण्यस्य इदमेव निदर्शनम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

आर्यभटः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

आर्यभटः

(क्रिस्तोः पश्चात् पञ्चमशताब्दी)

भारतीयगणितशास्त्रेतिहासः अतीव प्राचीनः। एतच्छास्त्रसंबद्धाः **पौलिक-रोमक-वासिष्ठ-सौर-पैतामहाख्याः** पञ्च सिद्धान्ताः प्रचुरप्रचाराः आसन्। परन्तु अद्यत्वे सिद्धान्तैरेतैः संबद्धाः मूलग्रन्थाः केऽपि न लभ्यन्ते। तान् ग्रन्थान् आश्रित्य कालक्रमेण कांश्चित् विषयव्यत्ययान् कृत्वा निबद्धाः केचित् ग्रन्था एव केवलमद्य लभ्यन्ते। विशेषतः सौरसिद्धान्तग्रन्थाः प्रचारे वर्तन्ते। अद्य लभ्यमानेषु ज्योतिः-शास्त्रगणितशास्त्रग्रन्थेषु **आर्यभटस्य** ग्रन्था एवातिपुरातनाः।

शास्त्रेऽस्मिन् आर्यभटनामानौ द्वौ विद्वांसौ श्रूयेते। तयोः प्रथम एव प्रधानः। अस्य जन्म ३५७७ मिते कलियुगाब्दे, क्रिस्तोः पश्चात् ४७६ तमवर्षे अभवत्। कृत-त्रेता-द्वापर- कलियुगैः एको महायुगः भवति, महायुगे पादत्रये व्यतीते (कृतत्रेता-द्वापरेषु व्यतीतेषु) षष्टियुगमिते काले (६०x६० = ३६००) मम वयसि त्रयोविंशवर्षाणि गतानि इति आर्यभटः कालक्रियापादे अवदत्—

षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनो याताः॥

अयं कुसुमपुरनिवासी। अद्यतन-बीहारराष्ट्रस्य राजधानी पाट्ना एव पुरा कुसुमपुरी (पुष्पपुरी)

ब्रह्मकुशबुधभृगुरविकुजगुरुकोणभगणान्नमस्कृत्य।
आर्यभटस्त्विह निगदति कुसुमपुरेऽभ्यर्चितं ज्ञानम्॥

(गणितपादः)

Digitization by Arya Samaj Charitable Foundation, Chennai

आर्यभटः कुसुमपुरनिवासी आसीच्चेत् स्यान्नाम । परन्तु जन्मना अयं केरलदेशीयः इति केचित् केरलदेशीयाः पण्डिता वदन्ति । आर्यभटीयव्याख्याता केरलदेशीयः **नीलकण्ठसोमसुत्वा** स्वभाष्यस्य आरभ्भे "अश्मकजनपदजातः आर्यभटाचार्यः..." इत्यादि लिखन् आर्यभटम् अश्मकदेशीयं वदति । अद्यतनतिरुवान्कूर निकटदेश एव अश्मकदेशः । अद्यावधिलब्धाः आर्यभटीयव्याख्या आपि केरलदेशीयैरेव रचिताः । अतोऽप्ययं केरलदेशीय एव स्यादिति तेषामाशयः । पूर्वोक्तस्य श्लोकस्यार्थं विवृण्वता **भास्करेण** — "अयं किल स्वायंभुवसिद्धान्तः कुसुमपुरनिवासिभिः कृतिभिः पूजितः, सत्स्वपि पौलिश-रोमक-वासिष्ठ-सौरेषु । तेनाह — कुसुमपुरेऽभ्यर्चितं ज्ञानम् इति" लिखितम् (Introduction to Aryabhatiya, edited by K. Sambasiva sastri, Trivandrum, 1930 p.1) । लङ्कायां संभवतः सूर्योदयास्तमयार्धरात्रादीननुसृत्य आर्यभटेन स्वीये ग्रन्थे दिनप्रमाणादयः निर्णीताः । अतोऽप्ययं लङ्कातो नातिदूरे केरलदेशे जातः तत्रैव च कृतनिवास इति वक्तुम् उचितं प्रतिभाति । बीहारदेशे किल आर्यभटमतस्य न कोऽपि प्रचारः अस्ति । दक्षिणापथे कर्णाटदेशे वैष्णवैः किलेदं मतमार्यभटीयं नितरामाद्रियते । अतः कुसुमपुराख्यो ग्रामो नगरं वा दक्षिणापथ एव कुत्राप्यासीदित्यप्यभ्यूहितुं शक्यते ।

आर्यभटरचितस्य ज्योतिःशास्त्रग्रन्थस्य **आर्यभटीयम्** इत्येव प्रसिद्धिः । **आर्यसिद्धान्तः** इति चापरं नाम । अनेन आर्यभटीयनाम्ना ग्रन्थद्वयं रचितम् । परन्तु त्रयोविंशतिवर्षवयस्केनानेन रचितमार्यभटीयम् अद्य नोपलभ्यते । परिणते वयसि रचितमेव उपलभ्यते इत्याशेरते केचिद्विद्वांसः ।

बहुभिः ग्रन्थैः प्रतिपादनीयस्य अतिविस्तृतस्य विषयस्य, सूत्रैरिवातीव संक्षिप्य, प्रतिपादने आर्यभटीयस्य सुमहद्वैशिष्टयं वर्तते । एतादृशस्य संक्षिप्तत्वस्य साधनाय आर्यभटेन काश्चित् परिभाषाः प्रकल्पिताः । आर्यभटीये **गीतिकापादः, गणितपादः, कालक्रियापादः, गोलपादश्चेति** पादचतुष्टयं वर्तते ।

गीतिकापादः— अन्त्यं फलश्रुतिश्लोकं विहायास्मिन् दश **श्लोका गीतिच्छन्दसि** वर्तन्ते । अतः अस्य **दशगीतिकासूत्रम्** इति नाम **आर्यभटेनैव कृतम्** ।

Digitization by Arya Samaj Charitable Foundation, Chennai

संख्यानां निर्देशाय आर्यभटेन केचित् संकेताः कल्पिताः। वर्णमालागतः एकैको वर्णः एकैकस्याः संख्यायाः संकेतः। तद्यथा—

अ = १, इ = १००, उ = $१००^{२}$, = १०००, ऋ = $१००^{३}$, = १०००००

लृऋ = $१००^{४}$ = १००००००००, ए = $१००^{५}$ = १०००००००००

ऐ = $१००^{६}$ = १०००००००००००

ओ = $१००^{७}$ = १०००००००००००००

औ = $१००^{८}$ = १०००००००००००००००

क = १, ख = २, ग = ३, घ = ४, ङ = ५, च = ६, छ = ७, ज = ८, झ = ९, ञ = १०, ट = ११, ठ = १२, ड = १३, ढ = १४, ण = १५, त = १६, थ = १७, द = १८, ध = १९, न = २०, प = २१, फ = २२ ब = २३, भ = २४, म = २५, य = ३०, र = ४०, ल = ५०, व = ६०, श = ७०, ष = ८०, स = ९०, ह = १००

उदाहरणम्: - एकस्मिन् महायुगे सूर्यादिभिः ग्रहैः कियन्ति वा भ्रमणानि क्रियन्ते इति एतानि परिभाषापदानि उपयुञ्जानः आर्यभटः एकस्मिन् श्लोके अकथयत्। सूर्येण ४,३२,००० भ्रमणानि कियन्ते इति कथयितुं "ख्यु घृ" इति संख्यावाचकं प्रयुनक्ति।

"ख्यु घृ" इत्यक्ते "खु, यु घृ" खु = २x१०००० = २०,००० + यु = ३०x१०,००० = ३००,००० + घृ = ४x१०००,००० = ४००००० = ४३२०,००० इति भवति। अन्येषां ग्रहाणां भ्रमणसंख्यापि एवमेव निरूपिता। एतादृशसंकेतानां साहाय्येनैव आर्यभटः अतीव विस्तृतं शास्त्रं इयता संक्षिप्तेन रूपेण निर्मातुं शशाक। अस्मिन् श्लोके आर्यभटः भूमेरपि परिभ्रमणम् अस्तीति प्रत्यपादयत्। महायुगे कृत-त्रेता-द्वापर-कलियुगाः भवन्ति। तेषां संवत्सरसंख्या तु नितरां परस्परं विभिन्ना पौराणिकादिभिः प्रतिपाद्यते। परन्तु आर्यभटः तन्मतात् भिन्नतया चत्वारोऽपि युगाः समानप्रमाणाः इति तृतीये श्लोके प्रतिपादयामास। राशि-अंश-कलादीनां संबन्धः, अङ्गुल-हस्त-पुरुष-योजनादिप्रमा-

Digitization by Arya Samaj Charitable Foundation, Chennai

णानि, पृथ्वी-सूर्य-चन्द्रादीनां व्यासाः, ग्रहाणां क्रान्तिविक्षेपाः इत्यादयो विषयाः अस्मिन् प्रथमे पादे प्रतिपादिताः।

गणितपादः—त्रयस्त्रिंशच्छ्लोकात्मके अस्मिन् पादे आर्यभटेन अनेके नूतना विषयाः तत्प्रथमतया प्रतिपादिताः। पूर्वोदाहृतः 'ब्रह्म कु...' इत्यादिश्लोकः अस्य पादस्य आदिमः श्लोकः।

एकं दश च शतं च सहस्रमयुतनियुते तथा प्रयुतम्।
कोट्यर्बुदं च वृन्दं स्थानात् स्थानं दशगुणं स्यात्॥

इति श्लोके उत्तरोत्तरदशगुणाः संख्याः उक्ताः। एकम् = १, दश = १०, शतम् = १००, सहस्रम् = १०००, अयुतम् = १०,०००, नियुतम् = १००,०००, प्रयुतम् = १,०००,०००, कोटिः = १०,०००,०००, अर्बुदम् = १००,०००,०००, वृन्दम् = १,०००,०००,०००.

ततः कैश्चित् श्लोकैः वर्गः, वर्गक्षेत्रम्, घनम्, घनफलम्, वर्गमूलम्, घनमूलम्, त्रिभुजानां क्षेत्रफलम्, त्रिभुजाकारशङ्कोः घनफलम्, वृत्तस्य क्षेत्रफलम्, गोलघनफलम् इत्यादयः प्रतिपादिताः। परिधेःषष्ठभागस्य ज्या तस्य त्रिज्यातो समा भवेत् इति प्रतिपादितम्। यदि एकस्य वृत्तस्य व्यासः २० सहस्राणि तदा तस्य परिधिः ६२,८३२ भवति इति सूक्ष्मो विषयः—

चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम्।
अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः।

इति श्लोके उक्तः। बीजगणितसंबद्धाः विषयाः भुजज्या (श्रीढि)- त्रैराशिकअपूर्णाङ्क-संबन्धिनश्च विषयाः प्रतिपादिताः। टालमी-प्रभृतयः ग्रीस्देशीयाः ज्योतिशास्त्रविदः 'सैन्' इति उच्चमानां भुजज्यां न जानन्ति स्म। भारतीयज्योतिःशास्त्र- परिचयोदयात् पूर्वं पाश्चात्यविद्वांसः एतं सैन्-अधिकृत्य नवमशताब्दीयेन अलबटानी नाम्ना अरबदेशीयेन तत्प्रथमतया प्रतिपादितमिति अचिन्तयन्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अलबटानीतः चतुःपञ्चशताब्देभ्यः पूर्वमेव अस्य प्रसङ्ग आर्यभटीये कृतः इति पश्चादजानन् पाश्चात्याः ।

पैथागरेण तत्प्रथमतया प्रतिपादितमिति धिया तन्नाम्ना प्रख्यपितं पैयागरस्थीरम् इत्येतत् तस्मात् नैकशताब्दीभ्यः पूर्वमेव शुल्बसूत्रे विशदीकृतम् । आर्यभटेनापीदं प्रत्यपादि ।

वृत्त-त्रिभुज-चतुर्भुजानां निर्माणरीतिः समतलपरीक्षापद्धतिः, दीपस्य समीपे निखातस्य शङ्कोः छायायाः साहाय्येन दीपस्य उन्नति-दूरादीनां ज्ञानायोपयुक्तानि सूत्राणि इत्येवमादयो विषयाः पादेऽस्मिन् प्रतिपादिताः ।

कालपादः—पञ्चविंशतिश्लोकात्मके पादेऽस्मिन् प्रथमतः वर्ष-मासप्रभृतीनि कालस्य मानानि उक्तानि । द्वादशमासा एकं वर्षम् । ३० दिवसाः एको मासः । ६० नाड्यः एको दिवसः । ६० विनाड्यः एका नाडी । विनाडी, विनाडिका, विघटिका एतानि समानार्थकानि पदानि । षष्टिसंख्याकानां दीर्घाक्षराणामुच्चारणे, अथवा षण्णां श्वासानां ग्रहणे च यावान् कालः अपेक्ष्यते सा विनाडिका ।

गुर्वक्षराणि षष्टिर्विनाडिकाकर्ष्यो षडेव वा प्राणाः ।
एवं कालविभागः क्षेत्रविभागस्तथा भगणात् ॥

(आ. भ. २.३)

क्षेत्रविभागोऽपि कालविभागवदेव इति उत्तरार्धस्यार्थः । राशिचक्रस्य भगण इति नाम ।यथा एकस्मिन् वर्षे द्वादश मासाः भवन्ति तथा भगणे द्वादश राशयः भवन्ति । मासे त्रिंशद्दिवसवत् एकैकस्मिन् राशौ त्रिंशद्भागाः भवन्ति । भागे ६० लिप्ताः, लिप्ते ६० विलिप्ताः, विलिप्ते ६० तत्पराश्च इत्यादिविधया भवन्ति इत्यर्थः । रविमास-शशिमास - अधिकमासादयः, विविधानि वर्षाणि च प्रतिपादितानि । एकं रविवर्षं मनुष्यवर्षम् । ३० मनुष्यवर्षाणि एकं पितृवर्षम् । द्वादश पितृवर्षाणि एकं दिव्यं वर्षम् । १२००० दिव्यवर्षाणि एको युगः । युगस्य पूर्वार्धं उत्सर्पिणीकाल इति, उत्तरार्धम् अवसर्पिणीकालः इति च उच्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

चैत्रशुक्लप्रतिपदमारभ्य मासवर्षयुगादिगणना प्रवर्तते । एवं पादेऽस्मिन् कालग्रह-गत्यादिसंबद्धाः विषयाः प्रतिपादिताः ।

गोलापादः— अन्तिमेऽस्मिन् चतुर्थपादे पञ्चाशत् श्लोकाः विद्यन्ते । रविमार्गविन्दुः मेषादिर्भवति इति प्रथमश्लोके उक्तम् । अनेन ज्ञायते आर्यभटेन वसन्तविषुवत् अङ्गीक्रियते इति । अत एव मेषस्य आरम्भादारभ्य रविः कन्यान्तं उत्तरां दिशं प्रति चलति, तुलाश्चारम्भात् प्रभृति मीनान्तं दक्षिणां दिशं प्रति चलति इति उक्तम् । ग्रहाणां पाताः, भूच्छाया रविगतिः इत्यादिविषयाः द्वितीयतृतीयपादयोः उक्ताः । सूर्यात् कियति वा दूरे स्थिताः चन्द्र-कुज-बुधाः दृग्गोचरतां यान्ति इति विषयः चतुर्थे श्लोके प्रतिपादितः । पृथ्वी-ग्रह-नक्षत्रार्धगोलाः यदा सूर्याभिमुखाः तदा प्रकाशन्ते इति द्वितीयार्धं स्वच्छायायैव प्रकाशहीनं भवति इति च पञ्चमश्लोके उक्तम् । पृथिव्याः ग्रहणां च विषये इदं सत्यमेव, नक्षत्राणां विषये पुनः न इति वदन्ति आधुनिकाः । भूमिं परितः कश्चन जलवायुः (प्रायः ozone सदृशः.स एव वा) वर्तते (६.७) । ब्रह्मणः दिवासमये भुवः गोलः योजनमेकं वर्धते रात्रौ च क्षीयते (१८) । नौस्थेन यथा तीरस्थाः वृक्षाः प्रतीपं गच्छान्तीव दृश्यन्ते तथा भुवः चलनात् लङ्कागतभूमध्यरेखायाः स्थिराणि नक्षत्राणि पश्चिमां दिशं प्रति चलन्तीव दृश्यन्ते ।

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमतां यद्वत् ।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम् ॥

(गोलपादः ९)

भारतीयेषु प्राचीनखगोलशास्त्रज्ञेषु भूभ्रमणस्याङ्गीकर्ता आर्यभट एक एव । नक्षत्रादीनामपि चलनमस्ति, यतः प्रवहाख्येन वायुना चाल्यन्ते इति आर्यभटः वदति एकादशे श्लोके । उत्तरध्रुव-दक्षिणध्रुवौ, खगोलगणितसंबद्धाः काश्चित् परिभाषाः, सूर्यचन्द्रग्रहणगणनपद्धतिः इत्याद्या विषयाः पादेऽस्मिन् प्रतिपादिताः । अन्ते चोक्तम् आर्यभटेन

सदसद्ज्ञानसमुद्रात् समुद्धृतं देवताप्रसादेन ।
सद्ज्ञानोडुपरत्नं मया निमग्नं स्वमतिनावा ॥ (३.४९) इति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ग्रन्थस्यास्य रचनाकालात् प्रभृति अद्य यावत् अस्य अतिमहानादरः दृश्यते। ग्रन्थमेतमाश्रित्य रचिता नैके प्रचुरप्रचाराः करणग्रन्थाः (manuals) ग्रन्थस्यास्य प्राशस्त्यं प्रथयन्ति। सत्स्वप्यन्येषु सिद्धान्तेषु ग्रहणग्रहगत्यादिषु दृग्विरोधदर्शनात् साक्षाद्भगवानादित्य एव आर्यभटनाम्ना अवतीर्य शास्त्रमिदं निर्ममे इति प्रसिद्धः कश्चित् श्लोकः आर्यभटं स्तौति—

सिद्धान्तपञ्चकविधावपि दृग्विरुद्धं
मौढ्योपरागमुखखेचरचारक्लृप्तौ ।
सूर्यः स्वयं कुसुमपुर्यभवत् कलौ तु
भूगोलवित् कुलप आर्यभटाभिधानः ॥

आर्यभटीयमिदं **अरबदेशेष्वपि** प्रचुरं प्रचारमलभत। अष्टमशताब्द्याः मध्ये, नवमशताब्द्याः प्रारम्भे च **अब्बासैड् खालिफाभ्याम् आल्मन्सूर- आल्मामुनामभ्यां** ग्रन्थस्यास्य प्रचाराय महत् प्रोत्साहनं दत्तम्।

क्रिस्तशकस्य ३६० तमवर्षसमीपगानां **डयोफास्टस**-प्रभृतीनां बीजगणित-ज्ञानस्य तुलना यदि आर्यभटीयज्ञानेन क्रियते तदा तेषां ज्ञानम् अतीव परिमितमिति स्पष्टीभवति। गणनसाहय्येन अनेकेषाम् अज्ञातफलानां ज्ञानाय आर्यभटेन यथा बीजगणितविधानं प्रवर्तितं तथा तैर्नैवाकारि।

गणितपादे ३२, ३३ श्लोकाभ्यां आर्यभटेन प्रोक्तः कुट्टाकारः (PULVE RISER) गणितशास्त्रस्य इतिहासे एव अपूर्वः इति पण्डिताः अभिप्रयन्ति। साग्रः (Residual) निरग्रः (non-residual) इति कुट्टाकारो द्विविधः।अस्य निरूपण-मनयोः श्लोकयोः कृतमार्यभटेन—

अधिकाग्रभागहारं छिन्द्यादूनाग्रभागहारेण।
शेषपरस्परभक्तमतिगुणमग्रान्तरे क्षिप्तम्॥

अथ उपरि गुणितमन्त्ययुगूनाग्रच्छेदजाजिते शेषम्।
अधिकाग्रच्छेदगुणं द्विच्छेदाग्रमधिकाग्रयुतम्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं नैकेषां गणितशास्त्रविषयाणां, ज्योतिःशास्त्रसिद्धान्तानां चाकरभूतमिदमार्यभटीयं सुमहतः पण्डितादरस्य पात्रमभूत्। एतदनुसृत्य तत्तत्कालेषु तैस्तैः विद्वद्भिः विरचिताः करणग्रन्थाः अद्यापि पञ्चाङ्गदीनां निर्मितौ बहुधा उपयुज्यन्ते। परन्तु मध्ययुगे ग्रन्थोऽयं दुर्लभः आसीत्। १८७४ तमे वर्षे **केर्न** नाम्ना पण्डितेन **लीडन्**नगरात् प्रकटितमिदमार्यभटीयं पुनरपि विदुषामध्ययनायोपलब्धम्। ततः व्याख्यानादिभिः साकम् अयं ग्रन्थः भारतीयैरपि प्रकटितः। अनेन ज्ञायते अयं ग्रन्थः केवलं केषांचित् पण्डितानामेव सविधे आसीत्, लुप्तं च नासीदिति। अनायासलभ्यानपि एतादृशान् ग्रन्थान्, ऋते विद्वद्भ्यः, को नु वा अध्येतुं शक्नुयात्?

द्वितीय आर्यभटः

यथा पूर्वं सूचितम् आर्यभटनामा अन्योऽपि ज्योतिःशास्त्रपण्डितः आसीत्। अयं गणिते, जयोतिःशास्त्रे च महता बेदुष्येण प्रसिद्धिमगात्। क्रिस्तशकस्य ९५० तमवर्षस्य निकटे आसीदयमिति मन्यन्ते विद्वांसः। अनेन रचितः **महासिद्धान्त**नामा ग्रन्थः ज्योतिःशास्त्रे प्रमाणतया गृह्यते। संख्याः सूचयितुं नूना रीतिः अनेन अनुसृता, यैवोच्यते कटपयादिपद्धतिरिति। आधुनिकेष्वपि ग्रन्थेषु अस्याः पद्धतेः प्रचारः दृश्यते। क, ट, प, य = १; ख, ठ, फ, र = २; ग, ड, ब, ल = ३; घ, ढ, भ, व = ४; ङ, ण, म, श = ५; च, त, ष = ६; छ, थ, स = ७; ज, द, ह = ८; झ, ध = ९; ञ, न = ०

सङ्केतेष्वेषु हलामेव प्राधान्यम्। अज्विपर्ययेऽपि नार्थभेदः। तद्यथा क, का, कि, की, इति यत्किमप्यक्षरं एकसंख्यासङ्केततया उपयोक्तुं शक्यते। एतान्यक्षण्युपयुज्य एकस्मिन् कल्पे सूर्यभगणान् सूचयितुं 'घ ड फे न ने न नु नी ना' = ४३२०००००० इति, चन्द्रभगणान् सूचयितुं 'म य य म ग ग ब न नु ना' = ५७७५ ३३३००० इति च वक्तुं शक्यते। एते विनायासं कण्ठस्थीकर्तुं शक्यन्ते। प्रथमार्यभटोक्तपद्धताविव अत्र क्लेशः, दोषसंभावना च न स्तः।

महासिद्धान्ते अष्टादशसु अधिकारेषु ६२५ श्लोकाः आर्याछन्दसि सन्दृब्धाः। ग्रन्थेऽस्मिन् प्राचीनग्रन्थगताः गणितज्योतिषविषयाः स्पष्टतया सविस्तरं विशदीकृताः।

Digitization by Arya Samaj Charitable Foundation, Chennai

वराहमिहिरः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

वराहमिहिरः

(क्रिस्तोः अनन्तरं ४९९-५८७)

वराहमिहिरः उज्जयिनीनिकटनिवासिनः **आदित्यदासाख्यस्य** पुत्रः आसीत्। अयं पञ्चमशताब्द्याः अन्ते जातः इति अस्य ग्रन्थेभ्यः अवगम्यते। अनेन सर्वा विद्याः विशेषतश्च ज्योतिःशास्त्रम्, पितुरेव अधीताः। कापित्थकक्षेत्रे सूर्यमुपास्य तदनुग्रहोऽधिगत इति वराहमिहिरः वदति —

आदित्यदासतनयस्तदवाप्तबोधः
कापित्थके सवितृलब्धवरप्रसादः।

आवन्तिको मुनिमतान्यवलोक्य सम्यक्
होरां वराहमिहिरो रुचिरां चकार॥

(बृ. जा. २६ अध्यायप्रारम्भे)

अयं क्रिस्तशकस्य ५८७ तमे वर्षे मृत इति प्रसिद्धिः।

ज्योतिःशास्त्रं **त्रिस्कन्धशास्त्रम्** इत्युच्यते यतः शास्त्रस्यास्य **सिद्धान्तस्कन्धः, संहितास्कन्धः फल**-(होरा) **स्कन्धश्चेति** त्रयः स्कन्धाः (शाखाः) सन्ति। त्रिष्वप्येतेषु वराहमिहिरेण ग्रन्थाः रचिताः। सिद्धान्तस्कन्धसंबद्धः पञ्चसिद्धान्तिकाख्यः ग्रन्थः अनेन प्रथमं रचितो ग्रन्थः। **बृहत्संहिता** संहितास्कन्धसंबद्धा। **बृहज्जातकं** च फल-(होरा) स्कन्धसंबद्धम्। वराहमिहिरेण बृहत्संहितायाः प्रथमेऽध्याये, स्वविरचितानां ग्रन्थानां निर्देशः कृतः —

वक्रानुवक्रास्तमयोदयाद्या-
स्ताराग्रहाणां करणे मयोक्ताः।

Digitization by Arya Samaj Charitable Foundation, Chennai

होरागतं विस्तरतश्च जन्म
यात्राविवाहैः सह पूर्वमुक्तम्॥ इति

अत्रोक्तः होराग्रन्थः 'बृहज्जातकम्' एव। करणग्रन्थः 'पञ्चसिद्धान्तिका'। 'यात्राग्रन्थः' 'विवाहग्रन्थः' च निर्मितौ इति अनेन श्लोकेन ज्ञायते। विवाह- ग्रन्थस्य नाम बृहद्विवाहपटलः इति बृहत्संहिताव्याख्यायां **भट्टोत्पलेनो**क्तम्। इदं ग्रन्थद्वय- मद्य नोपलभ्यते। बृहज्जातकसारभूतं **लघुजातकम्** अपि वराहभिहिरेणार्याछन्दसि विरचितम्। एवं वराहमिहिरेण 'पञ्चसिद्धान्तिका' (करणग्रन्थः), 'बृहद्विवाहपटलः', 'बृहज्जातकम्', 'लघुजातकम्', 'यात्राग्रन्थः', 'बृहत्संहिता', च अनेनैव क्रमेण निर्मिताः। इतोऽप्यन्ये समाससंहिता, जातकार्णवः, विवाहपटलः, ढिकनिकयात्रा, 'ग्रहमण्डलफलम्', 'पञ्चपक्षी, दिक्किनीयात्रा इति ग्रन्था अपि वराहमिहिरेण रचिता इति लोके प्रसिद्धिः। वराहमिहिररचितः करणग्रन्थः पञ्चसिद्धान्तिका न, परं तु नेपालदेशे वीरपुस्तकालये लभ्यः जातकार्णवः एवायं करणग्रन्थ इति केचित् पण्डिताः वदन्ति। समाससंहिता न लभ्यते। बृहज्जातकस्य लघुजातकवत् इयं बृहत्संहितायाः संग्रहः स्यादिति केचित् मन्यन्ते। एतेषां इतरग्रन्थानां कर्तृत्वे विद्वत्सु विप्रतिपत्तिः दृश्यते।

पञ्चसिद्धान्तिका— भारते बहोः कालात् लब्धप्रचाराणां पैतामह - वासिष्ठ- रोमक-पौलिश-सौरसिद्धान्तानां सारोऽस्मिन् ग्रन्थे निक्षिप्तः। संगृहीत सकलदर्श- नसारस्य सर्वदर्शनसंग्रहस्य यथा दार्शनिकग्रन्थेषु वैशिष्ट्यं तथैवास्यापि ज्योतिः- शास्त्रग्रन्थेषु। "एतेषु पञ्चसु सिद्धान्तेषु सौरसिद्धान्त एवोत्तमः। अस्यानन्तरं रोमक- पौलिशसिद्धान्तयोः तुल्यं प्राधान्यम्, अन्यौ द्वावपि सिद्धान्तौ सारविहीनौ" इति प्रत्यपादि वराहमिहिरेण।

सूर्यसिद्धान्तः इति नाम्ना अद्याप्युपलभ्यस्य ग्रन्थस्य सारोऽपि वराहमिहिरेण ग्रन्थेऽस्मिन् संगृहीतः। परंतु सूर्यसिद्धान्तग्रन्थगता विषयाः वराहमिहिरेण संगृही- तेभ्यः किंचित् विषयेभ्यः भिद्यन्ते। वर्षसहस्रात् पूर्वं (वराहमिहिरादर्वाक्) प्राचीने सूर्यसिद्धान्तग्रन्थे वेधानुगुण्येन कानिचित् संशोधनानि कृतानि भवेयुः वराहमिहिरेण

Digitization by Arya Samaj Charitable Foundation, Chennai

तु स्वकाले लब्धप्रचारस्य सूर्यसिद्धान्तस्य संग्रहः कृतः; प्रायः अत एव एते केचित् भेदाः उपलभ्यन्ते ।

ऋते सूर्यसिद्धान्तात् अन्यसिद्धान्तसंबद्धाः ग्रन्थाः अद्य नोपलभ्यन्ते । तत्सिद्धान्तसारसंग्रहीत्रा वराहमिहिरेण ज्योतिर्विदां महानुपकारः कृतः । पञ्चसिद्धान्तिकायाः त्रयोदशाध्यायस्य नाम **त्रैलोक्यसंस्थानम्** इति । अस्य पूर्वोक्तानां पञ्चानां सिद्धान्तानां च न कोऽपि सबन्धः । अतोऽयं भागः वराहमिहिरस्य स्वतन्त्रा रचना स्यात् । अस्मिन्नध्याये प्रपञ्चनिर्माणादीनां वर्णना कृता । भूगोलस्वरूपमेवं रुचिरं वर्णितं अध्यायस्यास्य प्रथमे श्लोके—

पञ्चमहाभूतमयस्तारागणपञ्जरे महागोलः ।
खेऽयस्कान्तःस्थो लोह इवावस्थितो वृत्तः ॥

भूगोलस्य च गोलाकारत्वात् कानिचिन्नगरादीनि उन्नते स्थाने सन्ति, कानिचिच्च अवनते इति वक्तुं न शक्यते इति वदति वराहमिहिरः । एवमन्यस्मिन् श्लोके—"मनुष्याध्युषिते भूभागे अग्नेः शिखा वायौ यथा ऊर्ध्वं प्रसरति, ऊर्ध्वं प्रक्षिप्तं वस्तु यथा भूमौ पतति तथैवासुराध्युषितेऽपि भूभागे" इति प्रतिपादयति । परन्तु वराहमिहिरः भूमेः परिभ्रमणं नाङ्गीकरोति ।

छेदकयन्त्राणि इति चतुर्दशाध्याये खगोलशास्त्रसंबद्धानां केषांचिद्यन्त्राणां वर्णनं कृतम् । यन्त्रसंबद्धान् विषयान् स्थूलतया निवेद्य वदति वराहमिहिरः "यन्त्रणामेषां रहस्यं गुरुणा केवलं स्थिरबुद्धिभ्यः शिष्येभ्य एव बोधनीयम् । शिष्यैरपि यन्त्रज्ञानम् अतिरहस्यतया गोपनीयम् ।" इति

बृहज्जातकम्—अयं फलभागसंवद्धः विंशत्यध्यायात्मकः ग्रन्थः । अस्मिन् ४१७ श्लोकाः सन्ति । **होराशास्त्रमित्यप्यस्य नाम** । अहोरात्रशब्दस्य आद्यान्त्याक्षरयोः लोपे होरा शब्दः निष्पन्नः । अतः अहोरात्रयोः भोक्तव्यस्य पूर्वजन्मार्जितशुभाशुमकर्मफलस्य कथनात् अस्य होराशास्त्रम् इति नामेति वदति वराहमिहिरः—

होरेत्यहोरात्रविकल्पमेके
वाञ्छन्ति पूर्वापरवर्णलोपात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्माजितं पूर्वभवे सदादि
यत्तस्य पक्तिं समभिव्यनक्ति ॥

(बृ. जा. १.३)

वराहमिहिरेण स्वग्रन्थेषु अनेके ग्रीक्भाषाशब्दाः प्रयुक्ताः । होरा शब्दोऽपि तादृश एव भवेत् । सार्धघटिकाद्वयमितस्य कालस्य होरा इति नाम । अस्मादेव शब्दात् Hour इति आंग्लभाषाशब्दः उत्पन्नः । वराहमिहिरेण पुनः अनया रीत्या शब्दोऽयं संस्कृतीकृतः इति वदन्ति केचित् ।

जातकशास्त्रीयाः अनेके विषया ग्रन्थेऽस्मिन् सुरुचिरवृत्तनिर्मितैः श्लोकैः प्रतिपादिताः । अत्र ये न सन्ति विषयाः, न ते कुत्रापि होराशास्त्रे लभ्येरन् । एतद्ग्रन्थसाहाय्येन फलानि निर्णेतुं नवांशगणितस्यापि ज्ञानमावश्यकम् । अत एवैतद्ग्रन्थानुबन्धत्वेन वराहमिहिरः मूलसूत्रग्रन्थमेकं नवांशगणिताख्यं व्यरीरचदिति प्रसिद्धिः । स ग्रन्थः किल उत्कल- (ओरिस्सा) देशीयेषु कार्तान्तिकेषु वर्तते, यस्य साहाय्येन ते अतीवाद्भुतया रीत्या जातकफलानि कथयन्ति ।

जातकफलानि निर्णेतुम् उपयुक्ताः **पराशरपद्धतिः, जैमिनीयपद्धतिः, कालचक्रपद्धतिः, मानसागरपद्धतिः, तायकपद्धतिः, नाडीपद्धतिः, गौरीजातकपद्धतिः बृहज्जातकपद्धति** श्चेति द्वादशपद्धतयः सन्ति ।एतासु अनेके भेदाः दृश्यन्ते । बृहज्जातमनुसृत्य ये फलानि निर्णिणीषन्ति, तैः बृहज्जातकपद्धतिरेवानुसर्तव्या ।

बृहज्जातकप्रतिपादिताः विषयाः-

१. **संज्ञाध्यायः** - एतच्छास्त्रीयाः राश्यादिसंज्ञाः

२. **ग्रहयोनिभेदाध्यायः**-ग्रहाणां स्वरूप-स्वभाव - दृष्टि-चेष्टा-शत्रुत्व-मित्रत्वादीनां वर्णनम् ।

३. **वियोनिजन्याध्यायः**-विविधपशुपक्ष्यादिजन्मनिर्णयः ।

४. **निषेकाध्यायः**- गर्भोत्पत्तेरारभ्य विविधानां दशानां वर्णनम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

५. **जन्मकाललक्षणाध्यायः** - कुतः, कथं, कीदृशस्वरूपस्वभावादिभिः जन्म भवेत् इत्यस्य निर्णयः ।

६. **बालारिष्टाध्यायः** - शैशवे एव मरणदाः योगाः ।

७. **आयुर्दायाध्यायः**- आयुःप्रमाणादिविचारः ।

८. **दशान्तर्दशाध्यायः**- दशानाम् अन्तर्दशानां निर्णायिकाः पद्धतयः ।

९. **अष्टकवर्गाध्यायः**-सूर्यादिग्रहाणां बलनिर्णये उपयुक्तस्य अष्टकवर्गस्य गणनाया विधानम् ।

१०. **कर्माजीवाध्यायः**-जीविकानिर्णयका योगाः ।

११. **राजयोगाध्यायः**- विविधा राजयोगाः ।

१२. **नाभसयोगाध्यायः**- पूर्वं यवनैः उक्ताना १८०० विधानां नाभसयोगानां, ३२ विधासु संक्षिप्य, प्रतिपादनम् । अन्येऽपि केचिद्योगाः ।

१३. **चन्द्रयोगाध्यायः** - चन्द्रस्थित्या संभाव्याः योगाः ।

१४. **द्विग्रहयोगाध्यायः** - द्विग्रहयोगजानि फलानि ।

१५. **प्रव्रज्यायोगाध्यायः** - संन्यासयोगाः ।

१६. **राशिशीलाध्यायः**-तत्तद्राशिषु तत्तद्ग्रहेषु स्थितेषु जातानां स्वभावाः ।

१७. **दृष्टिफलाध्यायः**-तत्तत्स्थानेषु स्थितस्य चन्द्रस्य इतरग्रहैः दर्शनिन फलानि ।

१८. **भावफलाध्यायः**- सूर्यादिग्रहेषु तत्तद्भावगतेषु फलानि ।

१९. **आश्रययोगाध्यायः** - ग्रहेषु स्वक्षेत्रमित्रक्षेत्रादिगतेषु फलानि ।

२०. **प्रकीर्णकाध्यायः**- ग्रहाणां परस्परकारकत्वादयो विविधा विषयाः ।

२१. **अरिष्टाध्यायः**-पुत्रकलत्रादिप्राप्तिः, तदप्राप्तिः, अन्ये च अरिष्टयोगाः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

२२. **स्त्रीजातकाध्यायः**- स्त्रीमात्रविषयकाः योगाः ।

२३. **नैर्याणिकाध्यायः**- मरणप्रकाराः मृतस्य देहपरिणामादयः मृतस्य गतयः । जातः प्राणी कुतो लोकादागतः इति ज्ञानम् ।

२४. **नष्टजातकाध्यायः**-जातकरहितस्य तन्निर्माणविधिः ।

२५. **द्रेक्काणाध्यायः**-मेषादीनां द्वादशानां राशीनां, षट्त्रिंशतां द्रेक्काणानां स्वरूपाणि ।

२६. **उपसंहाराध्यायः**-अस्मिन्नध्याये वराहमिहिरः ग्रन्थानुक्रमणिकादि उक्त्वा श्लोकेनानेन ग्रन्थमुपसंहरति ।

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम् ।
शास्त्रमुपसंगृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः ॥

एवं बृहज्जातकापरनामधेयं होराशास्त्रमिदं ज्योतिःशास्त्रसंबद्धान् अनेकान् विषयान् सम्यक् प्रतिपादयत् रचनाकालादारभ्य अद्य यावत् ज्यौतिषिकलोके विराजते ।

बृहज्जातकेऽस्मिन् वराहमिहिरेण अनेके विदेशीयाः पारिभाषिकशब्दाः प्रयुक्ताः । होरा-द्रेक्काणशब्दौ राशिभागविशेषवाचकौ, राश्यभिधायकाः क्रियताबुरि-जितुम-लेय-पाधोन-जूक-कौर्पि-तौक्षिक-अकोकेरशब्दाः, दुश्चिक्य-हिबुक- द्यून-मेघारण-रिप्फशब्दाः तत्तत्स्थानाभिधायिनः, त्रिकोण-कण्टक-फणफर-आपोक्लिमशब्दाः तत्तद्भाववाचकाः, हेली-आर-आवनेय-हेम्न-इज्य-आस्फुजित् कोण-आगुशब्दाः ग्रहवाचकाः, वाशि-वेशि-अनफा-सुनफा-दुरुधुरा - केमद्रुमशब्दाः तत्तद्योगवाचकाः, द्युत-जौ-मरशब्दाः संज्ञावाचकाः -एवं चत्वारिंशत् शब्दाः दृश्यन्ते । तेषु द्वित्राणां संस्कृतशब्दत्वसाधनेऽपि अन्ये सर्वेऽपि विदेशीयशब्दा एव । अनेन वराहमिहिरः यवन- (ग्रीस) देशं गत्वा तत्र अस्य शास्त्रस्याध्ययनं चकारेति स्पष्टं सूच्यते इति केचिन्मन्यन्ते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

एते शब्दाः तत्प्रथमतया वराहमिहिरेणैव नोपयुक्ताः, प्राचीनभारतीयग्रन्थेषु एषां प्रयोगाः दृश्यन्ते । अतः अनेन तं देशं गत्वा शास्त्रमिदमधीतमिति नैव शक्यते वक्तुम् । अपि च बृहत्संहितायाः अन्ते "प्राचीनान् सर्वानपि ग्रन्थान् एकमप्यपरित्यज्य, अधीत्य अयं ग्रन्थः निर्मितः; यदि भवद्भ्यो रोचते तैर्ग्रन्थैः सह अयं ग्रन्थोऽपि पठ्यताम्" इति सुजनानुद्बोधयति वराहमिहिरः -

पूर्वाचार्यग्रन्था नोत्सृष्टाः कुर्वता मया शास्त्रम् ।
तानवलोक्येदं च प्रयतध्वं कामतः सुजनाः ॥ इति ।

मध्ये च नैकत्र एवं लिखता तेन प्राचीनानाम् ऋषीणां नामानि प्रमाणतया प्रदर्शितानि । अतोऽपि ज्ञायते यदनेन प्राक्तनेभ्यः भारतीयग्रन्थेभ्य एव विषयाः संकलिता इति ।

एते शब्दाः भारतीयेषु प्राचीनग्रन्थेषु वा सन्तु वराहमिहिरस्य वा, एतच्छास्त्रविषये भारतीयाः ग्रीक्देशीयानाम् अधमर्णा इति एतैः शब्दैः बाढं सूच्यते किल इति केचित् वदन्ति । अयं वादोऽपि साररहित एव । यद्ययं सिद्धान्तः भारतीयैः यथातथमग्रहीष्यत तदा भारतीयनिर्मितेषु ग्रन्थेषु एतावन्तः मतभेदाः नाभविष्यन् । "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।" इति **गीतासु** भगवतोक्तया विधया लौकिकविविधविषयज्ञानं वा भवतु आध्यात्मिकज्ञानं वा, सर्वमपि ज्ञानं पवित्रमेवेति विश्वसन्तः निष्कपटहृदयाः अस्माकं पूर्विकाः । अतः देशेऽस्मिन् अविच्छिन्नेन क्रमेण वहति शास्त्रज्ञानप्रवाहे विदेशीयसिद्धन्तेषु यदि केचिदंशाः साधुतया भान्ति स्म तानपि मेलयित्वा शास्त्रमिदं परिवर्धितं तैः । ज्योतिःशास्त्रे अधिगतपाण्डित्यः पङ्क्तिपावनो भवति इति वदन् वराहमिहिरः बृहत्संहितायाम्—

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैववित्द्विजः ॥

(११.१४) इति भणति ।

अयं श्लोकः बृहत्संहितायाः पूर्वमेव गर्गाचार्यविरचिते कस्मिंश्चिद् ग्रन्थे किल अस्ति । स एवानेनोदाहृतः, अतः एतद्देशीयानां तद्देशीयैः सह शास्त्रविषये

Digitization by Arya Samaj Charitable Foundation, Chennai

अभिप्रायविनिमयाः प्रचलन्ति स्म इत्येतावदेव वक्तुं शक्यते; न पुनः आत्मना अज्ञातचरमेवेदं शास्त्रं भारतीयैः यवनेभ्यः अधिगतम् इति । तादृशो वादः आत्मावमाननमेव । अद्यत्वे बहूनि आङ्ग्लभाषापदानि 'बुक्-रोड्-पेन्'-इत्यादीनि भारतीय- भाषासु दृश्यन्ते । कालान्तरे लब्धप्रचुरप्रचारेषु तेषु पदेषु पुस्तक-मार्ग-लेखिन्यादीनि पदानि निघण्टुमात्रनिबद्धानि भवेयुः । किं तावता भारतीयाः पुस्तकादीनि नैवाजानन् इति वक्तुं शक्यते ? विदेशीयेषु वस्तुषु यथा अत्यादरः तथा विदेश्यपदेष्वपि स्यात् खलु येनैवैषां प्रयोगः कृतः वराहमिहिरेण ।

बृहत्संहिता :- ज्योतिःशास्त्रीयशाखाः सर्वा अपि मेलयित्वा तद्गतानां विषयाणां सर्वेषामपि चर्चा यस्मिन् क्रियते तस्य ग्रन्थस्य नाम पुरा संहिता इति आसीत् । परन्तु वराहमिहिरस्य काले गणितहोराभिन्नविषयप्रतिपादकस्य ग्रन्थस्यं संहितेति नाम प्रथितमभवत् । एवं गणितम् (सिद्धान्तः), होरा (फलभागः), संहिता इति त्रयः स्कन्धाः ज्योतिःशास्त्रस्य इति प्रथा संजाता ।

वराहामिहिरात् पश्चात् नातिचिरादेव अर्वाचीनैः ग्रन्थकारैः, संहितायां तेन चर्चितानां विषयाणां चर्चा परित्यक्तप्राया । तदा प्रभृति त्रिस्कन्ध्यां संहितायाः स्थाने मुहूर्तभागस्यानुप्रवेशः कृतः अर्वाचीनैः । बृहत्संहितायां वराहमिहिरेणोपनिबद्धानां परिशीलनेन इदं ज्ञायते यत् संहितायां देशसंबन्धिनोः शुभाशुभयोरेव विचारः विशेषतः दृश्यते न पुनः केवलपुरुषादिसंबद्धस्य ।

बृहत्संहितायां आहत्य १०५ अध्यायाः किंचिदधिका चतुःसाहस्री च श्लोकानमस्ति । अत्र प्रतिपादिताः विषयाः- सूर्यचन्द्रादिग्रहाणां संचारः, नक्षत्रमण्डले तेषां संचारेण भुवि वसतां प्राणिनां शुभाशुभफलानि, अगस्त्यस्य सप्तर्षीणां च उदयादिभिः जायमानानि फलानि, भारतवर्षस्य नव विभागाः, तेषु तेषु विभागेषु, तत्रत्यदेशेषु च तत्तन्नक्षत्राणाम् आधिपत्यस्य निरूपणम्, नक्षत्रव्यूहानाम् ग्रहयुद्ध-समागमानां च फलानि, संवत्सरफलानि, (ग्रहशृङ्गाटकप्रकरणे) सूर्यस्य निकटे वा, कस्यचिन्नक्षत्रस्य निकटे वा ग्रहाणां गमनेन कल्पितानां धनुः शृङ्गाद्याकृतीनां फलं, मेघानां गर्भधारणं वृष्टिश्च, मार्गशीर्षादिमासेषु धृतगर्भाणां मेघानां वर्षणरीतयः, चन्द्रस्य रोहिणी- स्वाति-पूर्वाषाढा-उत्तराषाढा-भाद्र-(पूर्वाभादा-उत्त-

Digitization by Arya Samaj Charitable Foundation, Chennai

राभाद्रा) नक्षत्रगतेः फलानि, आकस्मिकी वृष्टिः, पुष्पफललक्षणानि, सायंप्रातः संध्ये, दिग्दाहः, भूकम्पः, उल्कापातः, परिवेषः (सूर्यचन्द्रयोः) इन्द्रधनुः, गन्धर्वनगर-प्रतिसूर्य-वज्रपातादयः सृष्टौ दृश्याः अद्भुता विषयाः धान्यादीनां मूल्यम्, इन्द्रध्वजः, नीराजनम्, खञ्जनदर्शनफलानि, दिव्यानां, भौमानाम्, अन्तरिक्षजानां चोत्पातानां वर्णनं, विविधग्रहसंचारजाः देशोपद्रवाः (वास्तुप्रकरणे) गृहनिर्माणोपयोगि भूमिदार्वादीनि, तत्तत्प्रयोजनार्थं तत्तद्विधानां गृहाणां निर्माणम्, भूम्यन्तर्गतजलसंबद्धाः विषयाः, वृक्षायुर्वेदः प्रासादलक्षणं, वज्रलेपः, देवताप्रतिमाः, वास्तुप्रतिष्ठा, गावः, श्वानः, कुक्कुटाः, कमठाः, अजाः, पद्मरागादिमणयः तत्परीक्षा च, दीपलक्षणम्, दन्तधावनम्, शकुनानि, शुनां जम्बूकानां च रावस्य शुभाशुभफलम्, मृग-गजादीनां वर्णनम्, तिथि-नक्षत्र-गोचरग्रहाणां फलम्, इत्येते विषयाः सविस्तरं प्रतिपादिताः। विवाहं यात्रां चाधिकृत्य पृथाग्विरचित- ग्रन्थद्वयः वराहमिहिरः तौ विषयौ नास्पृशत्, संहितायाम्।

"अयं विषयः अस्य ऋषेः मतमनुसृत्स प्रतिपाद्यते" इति तत्र तत्र वदता वराहमिहिरेण गर्ग-पराशर-असित-देवल-वृद्धगर्ग-कश्यप-भृगु-वसिष्ठ-बृहस्पति-मनु-मय-सारस्वत-ऋषिपुत्राणाम् ऋषीणां नामानि निर्दिष्टानि। अनेन ज्ञायते वराहमिहिरस्य काले तावत्यः संहिताः लभ्यन्ते स्म इति। "अन्यान् बहुन्" इत्युक्त्या एभ्योप्यन्ये संहिताकाराः संहिताः जग्रन्थुरित्यनुमीयते। संहिताया अस्या व्याख्याता काश्मीरदेशीयः **भट्टोत्पलः** वराहमिहिरात् वर्षाणां चतुःशत्या अर्वाचीनः। अनेन वराहमिहिरस्य सर्वेषामपि ग्रन्थानां पाण्डितीमण्डिताः व्याख्याः रचिताः। वराहमिहिरतनयेन **पृथुयशसा** निर्मितायाः **षट्पञ्चाशिकायाः** अपि व्याख्या रचिता भट्टोत्पलेन। अनेन पूर्वोक्तेभ्योऽप्यन्ये आचार्याः, व्यास-भानुभट्ट-विष्णुगुप्त विष्णुचन्द्र-यवन-रोमक-सिद्धासन-नन्दि-नग्नजिदादयः निर्दिष्टाः व्याख्यासु। अनेन अनुमातुं शक्यते अद्यं कियद्वा संहितासाहित्यं विनष्टमिति।

अद्य विस्मृतप्रायाः अनेके विषयाः वराहमिहिरेण बृहत्संहितायां प्रतिप्रादिताः इति उपरि दत्तया विषयसूचिकया स्पष्टमवगम्यते। केचिद्विषयाः आधुनिकवैज्ञानिकसंमताः। केचित्तु आधुनिकवैज्ञानिकज्ञानमप्यतीत्य वर्तन्ते।

Digitization by Arya Samaj Charitable Foundation, Chennai

चन्द्रग्रहणसूर्यग्रहणे राहोर्वा केतोर्वा न भवतः। भुवश्छायया चन्द्रोपरागः, चन्द्रस्य छायायाः प्रसरणेन सूर्योपरागश्च भवति इति दिव्यदृष्टीनां पूर्वर्षीणां मतं वराहमिहिरः युक्तिप्रदर्शनपूर्वकं बृहत्संहितायां व्यवृणोत्।

भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्धात्। (५.८)

चन्द्रोऽधः स्थगयति रविमम्बुदवत्समागतः पश्चात्।
प्रतिदेशमतश्चित्रं दृष्टिवशाद् भास्करग्रहणम्॥(५.११)

नेदं मदुपज्ञम्। पूर्वाचार्यैरेव प्रतिपादितमिदमिति भणति वराहमिहिरः।

एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः॥ (५.१३)

प्रायः ज्योतिःशास्त्रग्रन्थाः अनुष्टुप्छन्दोबद्धैः श्लोकैः अथवा आर्यागीतिग्रथितैः रच्यन्ते। वराहमिहिरः पुनः स्वीयान् ग्रन्थान् विविधैः वृत्तैः सुरुचिरैः जग्रन्थ। तत्र तत्र उपमाद्यलंकारान् प्रयुञ्जानः मनोहरया काव्यरीत्या सहृदयानां चेतो रञ्जयति। विविधानां वृत्तानां प्रयोगेण संवादितं वैचित्र्यं स एव बृहज्जातकस्य प्रारम्भे एवं विशदयति-

भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि।
होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे॥ (१.२)

बृहत्संहितायामपि वराहमिहिरेण षष्टिः वृत्तानि प्रयुक्ता तत्र। ग्रन्थपठनकाले तत्र काव्यं पठामः इति धीः जायते पठितृणाम्। यथा -

पार्श्वद्वयाधिष्ठितचक्रवाका-
मापुष्णती सस्वनहंसपङ्क्तिम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

ताम्बूलरक्तोत्कृषिताग्रदन्ती
विभाति योषेव शरत् सहासा॥ (१२.८)

पेपीयते मधु मधौ सह कामिनीभि-
र्जेगीयते श्रवणहारि सवेणुवीणम्।

बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्न
मब्दे सितस्य मदनस्य जयावघोषः॥

बहुषु स्थानेषु लभ्यान् असंख्याकान् एतादृशान् श्लोकान् पठतः कस्य वा मनसि 'शास्त्रमहं पठामि' इति धीरुदियात्।

"रत्नानि वा वरं वनिता वा" इति प्रश्ने वनिता एव वरमिति वदति वराहमिहिरः।

रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या।
चेतो वनिता हरन्तयरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम्॥

(७३.३)

एवं च स्त्रिय एव रत्नानामलंकारः न पुनः रत्नानि स्त्रीणाम् इति निर्णयति।

तस्मिन् काले देशस्य, देशपालकानां च संक्षेममुद्दिश्य क्रियमाणाः विविधाः नीराजनप्रक्रियाः, इन्द्रध्वजमहोत्सवादीनि पुरातनानि उत्सवविधानानि अन्ये च बहवो विषयाः अस्मिन् ग्रन्थे वर्णिताः। देहे तिलानि, सामुद्रिकलक्षणानि, अश्वगजादीनां लक्षणानि च विपुलतया वर्णितानि। तस्मिन् काले प्रथितं नगरग्रामादिनिर्माणम्, गृहप्रासादादिनिर्माणं वा ज्ञातुम् उपकारकः एतादृशः नास्ति ग्रन्थोऽन्यः। अर्वाचीनानां **भोज-सोमदेवादिविरचितानां समराङ्गणसूत्रधार-अभिलषितार्थचिन्तामणि**-प्रभृतीनां च ग्रन्थानां इयं बृहत्संहितैव पथिप्रदर्शिनी। वास्तुसंवन्धिनो विषयाः प्रतिमानिर्मिति-शिल्पकलादयश्च विषयाः तैः अस्या एव संहितायाः संगृहीताः स्युः।

Digitization by Arya Samaj Charitable Foundation, Chennai

स्त्रीणां वैशिष्ट्यं, तासां पवित्रतां च वर्णयता वराहमिहिरेण विंशतिभिः श्लोकैः **स्त्रीप्रशंसाध्यायो** नाम कश्चिदध्याय एंव पृथक् निर्मितः। दम्पत्योः अन्योन्य-व्युत्क्रमे उभयोरपि समान एव दोषः। अथापि नराः धाष्ट्र्येन व्युत्क्रमं कुर्वन्ति; नैतन्न्याय्यमिति वदति मिहिरः-

दम्पत्योर्व्युत्क्रमणे दोषः समः शास्त्रे प्रतिष्ठितः।
नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः॥ (७३.१२)

दारातिक्रमणस्य प्रायश्चित्तं विधत्ते-

बहिर्लोम्ना तु षण्मासान् वेष्टितः खरचर्मणा।
दारातिक्रमणे भिक्षां देहीत्युक्त्वा विशुध्यति॥ (७३.१३)

वैराग्यबोधनमिषेण अङ्गनानां दोषानेव केवलं वर्णयन्तः किल दुर्जना एव-

येऽप्यङ्गनानां प्रवदन्ति दोषान्।
वैराग्यमार्गेण गुणान् विहाय
ते दुर्जना मे मनसो वितर्कः
सद्भाववाक्यानि न तानि तेषाम्॥ (७३.५)

एते किल एकतश्चौर्यं कुर्वन्तः ये चोराः 'चोरः चोरः' इति क्रन्दन्ति तैः सदृशाः-

अहो धार्ष्ट्यमसाधूनां निन्दतामनघाः स्त्रियः।
मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम्॥ (७३.१५)

सर्वेषामपि प्राणिनाम् अन्नादपि गरीयः जलं प्राणधारणे। भूमेः अन्तः कीदृशेषु स्थानेषु कियति दूरे जलं लभ्येत इति **दकार्गलाध्याये** १२४ श्लोकैः सुविस्तृतं प्रतिपादितं वराहमिहिरेण। मानवस्य शरीरे यथा रक्तनाड्यः भवन्ति, यथा च तासु रक्तं प्रवहति तथैव भूमेरन्तरपि जलनाड्यः सन्ति, तासु च जलं प्रवहति। उपरि स्थितानां तत्तद्वृक्षगुल्मादीनां साहाय्येन जलं भूमेरन्तः कुत्रास्ति इति ज्ञातुं शक्यते इति अस्याध्यायस्य सारः। एतादृशैः चिह्नैः किल केचिदद्यापि जलं भूमेरन्तः स्थितं जानन्ति।

Digitization by Arya Samaj Charitable Foundation, Chennai

वृक्षायुर्वेदाध्याये कृषिसंबद्धाः नैके विषयाः प्रतिपादिताः । भुवं कृष्ट्वा कथं सा बीजावापाय सन्नद्धीकर्त्तव्या, बीजानां शुद्धिः कथं कार्या, कीदृशं दोहदादिकं कर्त्तव्यं, वृक्षकाणां परस्परं कियति दूरे रोपणं कर्त्तव्यम् इत्याद्याः अस्मिन् अध्याये चर्चिताः ।

एवं वराहमिहिरेण न केवलं खगोल-गणित-होरादिसंबद्धा एव, दैनन्दिनव्यवहारोपयोगिन अनेके अविदितचराः विषयाः अपि वर्णिताः । पश्चात्तनैः विद्वद्भिः विषयाणामेतेषाम् उपेक्षैव कृता । अतः अविच्छिन्नस्य विमर्शस्य (Research) अभावात् सर्वमपीदं तत्रैव स्थितं यत्र वराहमिहिरेण समापितम् । यदि अविच्छिन्नः विमर्शः अभविष्यत् बहोः कालात् पूर्वमेव भारतीयाः पाश्चात्यैः मनसाप्यचिन्तनीयां वैज्ञानिकीं प्रगतिम् अलप्स्यन्त ।

"ज्योतिःशास्त्रमहासमुद्रं बुद्धिमन्देरण मथित्वा मयायं शास्त्रचन्द्रः समुद्धृतः । ग्रन्थस्यास्य एकस्मात् स्थानात् स्थानान्तरं प्रति गमने वा, मुखात् मुखे संचरणे वा, लेखकप्रमादेन वा केचिद्दोषाः सम्भाव्यन्ते । अथवा मयैव केचित् दोषा अज्ञानेन कृता भवेयुः तानपहाय विद्वांसः ग्रन्थमेतं गृह्णीयुः" इति सविनयविशेषं वदति वराहमिहिरः—

ज्योतिःशास्त्रसमुद्रं प्रमथ्य मतिमन्दराद्रिणाथ मया ।
लोकस्यालोककरः शास्त्रशशाङ्कः समुत्क्षिप्तः ॥ (१०५.१)

ग्रन्थस्य यत् प्रचरतोऽस्य विनाशमेति
लेख्याद् बहुश्रुतमुखाधिगमक्रमेण ।
यद्वा मया कुकृतमल्पमिहाकृतं वा
कार्यं तदत्र विदुषा परिहृत्य रागम् ॥ (१०५.५)

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

भास्कराचार्यः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

भास्कराचार्यः

(क्रिस्तोरनन्तरं द्वादशशताब्दी)

वर्षाणाम् अष्टशतानि न केवलं भारते, विदेशेष्वपि लब्धाखण्डयशाः **भास्कराचार्यः** महान् गणितशास्त्रपण्डितः। **सिद्धान्तशिरोमणौ** गोलाध्यायगतात् एकस्मात् श्लोकात् ज्ञायते यदयं महापण्डितः १०३६ तमे शकवर्षे, क्रिस्तशकस्य १११४ तमे वर्षे जनिं लेभे, वयसः षट्त्रिंशत्तमे वर्षे चं तं ग्रन्थं निर्ममे इति। अनेन वयसः एकोनसप्ततिमे वर्षे **करणकुतूहलम्** इति अन्योऽपि ग्रन्थः रचितः। द्वावप्येतौ ग्रन्थौ ज्योतिःशास्त्रस्य सिद्धान्तस्कन्धेन संबद्धौ।

महाराष्ट्रेषु सह्यसमीपे विज्जडविडग्रामाभिजनस्यास्य भास्कराचार्यस्य पिता **महेश्वरः**। अनेन पितुरेव सर्वा विद्या अधिगताः।

खान्देशे चलिसगाँवतः पञ्चक्रोशदूरे पाटण्नाम्नि कस्मिंश्चित् पुरातने ग्रामे भंवानीदेवालयस्थात् शिलाशासनात् ज्ञायते—भास्कराचार्यस्य पौत्रः चङ्गदेवः यादववंशीयस्यं सिंघण-राजस्य आस्थाने आस्थानज्योतिषपण्डितः आसीत्। सिंघणोऽयं देवगिरौ १२१० वर्षात् प्रभृति १२३७ वर्षपर्यन्तं राज्यमपालयत्। भास्करादिभिः पण्डितैः रचितानां ग्रन्थानाम् अध्ययनाध्यापने अविच्छिन्नतया प्रवर्तयितुं चङ्गदेवः पाटण्-ग्रामे मठमेकं स्थापयामास। सिंघणस्य सामन्तेन सोमदेवेन १२०८ तमे वर्षे तस्मै मठाय किंचिद्धनक्षेत्रादिकं दत्तम्। तस्य भ्रात्रा हेमाद्रिणापि किंचिद्धनक्षेत्रादिकं दत्तम्। शिलाशासनेऽस्मिन् भास्कराचार्यात् पूर्वेषां षण्णां तद्वंशीयानां नामानि लभ्यन्ते। एतादृशेभ्यः द्वित्रेभ्यः शासनेभ्यः ज्ञायते न केवलं भास्कराचार्यः तस्य पूर्विकाः पाश्चात्याश्च बहवः महापण्डिताः आसन्निति।

Digitization by Arya Samaj Charitable Foundation, Chennai

सिद्धान्तशिरोमणिः - अतीव बृहत्प्रमाणोऽयं ग्रन्थः । **अयं लीलावती, बीजगणितम्, गणिताध्यायः, गोलाध्यायश्चेति** चतुर्षं भागेषु विभक्तः । लीलावती भागस्य पाटीकगणितम् इत्यपि नाम । भास्कराचार्यः अध्यायमिमं स्वपुत्र्यै प्राभृततया दत्वा तस्या एव नाम्ना अस्य लीलावती इति नामाकरोत् । अस्मिन् २७८ श्लोकाः सन्ति । अध्यायस्यास्य प्रारम्भे प्रमाणानि (न केवलं भारतीयानामेव तुरुष्कादिषु व्यवहृतानि विदेश्यान्यपि) विवृतानि । ततः दशगुणोत्तररीत्या परार्ध ($२०^{२७}$) पर्यन्तं संख्याः दत्ताः । ततश्च संकलन-व्यवकलन-गुणन-भागहरण - वर्ग- (square) वर्गमूल-(square root) घन- (cube) घनमूल- (cube root) नाम परिकर्माष्टकं प्रतिपादितम् । ततः त्रैराशिक-पञ्चराशिक -सप्तराशिक - नवराशिकानि (the rule of three five seven and nine), भाण्डप्रतिभाण्डकम् (Barter of commodities), मिश्रव्यवहारः (Plane figures), खाताः (excavations), चितिः (Piles), क्रकचः (sawn pieces), राशिः (Heaps), छाया (shadow), कुट्टकम् (pulveriser), अङ्कपाशः (combinations and Permutations) इति विषयाः रुचिरैः उदाहरणैः सुमनोहरेषु वृत्तेषु प्रश्नोत्तररूपेण प्रतिपादिताः । अङ्कपाशस्यैकमुदाहरणम्-

पाशाङ्कुशाहिडमरूककपालशूलैः
खट्वाङ्गशक्तिशरचापयुतैर्भवन्ति ।
अन्योन्यहस्तकलितैः कति मूर्तिभेदाः
शम्भोर्हरेरिव गदारिसरोजशङ्खैः ॥ (लीला० २६३)

यदि महेश्वरस्य दशषु हस्तेधु पाशः, अङ्कुशः, सर्पः, डमरुः, कपालः, शूलः, खट्वाङ्गम्, शक्तिः, बाणः, धनुः इति दश आयुधानि अन्योन्यपरिवर्तनेन निक्षिप्यन्ते तदा तस्य कति मूर्तयः भवेयुः, एवमेव महाविष्णोः यदि हस्तचतुष्टये गदा-चक्र-पद्म-शङ्खाः अन्योन्यपरिवर्तनेन निक्षिप्यन्ते तदा तस्य कति मूर्तयः भवन्ति इति प्रश्नः, १, २, ३, ४, ५, ६, ७, ८, ९, १०, संख्यानां घाताङ्कात् (१x२x३x४x५x६x७x८x९x१० =३,६२८,८००) लब्धं महेश्वरस्य मूर्तीनां संख्या

Digitization by Arya Samaj Charitable Foundation, Chennai

३,६२८,८००. एवमेव १,२,३,४ संख्यानां घाताङ्कात् लब्धं फलं (१x२x३x४ = २४) श्रीमहाविष्णोः मूर्तीनां संख्या - २४ इति उत्तरम् ।

भाण्डप्रतिभाण्डस्यैकमुदाहरणं यथा -

द्रम्मेण लभ्यत इहाम्रशतत्रयं चेत्।
त्रिंशत् पणेन विपणे वरदाडिमानाम्।
आम्रैर्वदाशु दशभिः कति दाडिमानि
लभ्यानि तद्विनिमयेन भवन्ति मित्र॥ (लीला० ८९)

आपणे द्रम्मेणैकेन ३०० चूतानि लभ्यन्ते, एकेन पणेन च ३० दाडिमानि । यदि चूतानि दत्वा दाडिमफलानि ग्रहीतव्यानि दशभिः चूतफलैः कति वा दाडिमानि लभ्येरन् ? इति प्रश्नः ।

द्रम्मपणादीनि केषांचिन्नाणकानां नामानि । २० वराटकाः एका कांकिणी, ४ काकिण्यः एकः पणः, १६ पणाः एकः द्रम्मः, १६ द्रम्माः एकं निष्कम् ।

वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः।
ते षोडशद्रम्म इहावगम्यो
द्रम्मैश्च तैः षोडशभिश्च निष्कः। (लीला १२.२)

सिद्धान्तशिरोमणौ द्वितीयभागस्य बीजगणितम् इति नाम । अस्मिन् २१३ श्लोकाः सन्ति । तत्र तत्र गद्यान्यपि निबद्धानि । लीलावती-बीजगणितयोः किल **पारसीक**भाषायां परिवर्तनं कारितं **अकबरेण, षाजहानेन** च ।

भास्कराचार्यस्य बीजगणितं सम्यक् नियमबद्धो ग्रन्थः । अस्य प्रारम्भे क्षय-(Negative) स्व-(Positive) योः स्वरूपम्, तयोः संकलनव्यवलनसंबद्धाः नियमाः, गुणनभागहरणनियमाश्च प्रतिपादिताः । यथा - a x b = ab, (-a) x (-b) = ab, (-a) x (b) = ab इत्यादि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

योगे युतिः स्यात् क्षययोः स्वयोर्वा
धनर्णयोरन्तरमेव योगः।
संशोध्यमानं स्वमृणत्वमेति
स्वत्वं क्षयः सद्युतिरुक्तवच्च॥ (बी. ग. २)

स्वयोरस्वयोः स्वं वधः स्वर्णघाते
क्षयो भागहारेऽपि चैव निरस्तम्॥ (बी. ग. २)

स्वस्य (Positive quantitiy) वा क्षयस्य (Negative quantity) वा वर्गः (square) स्वम् (Positive) एव भवति। परं तु स्वस्य वर्गमूलम् स्वं वा भवेत् क्षयो (Negative) वा। क्षयस्य वर्गमूलं न भवति।

कृतिः स्वर्णयोः स्वं स्वमूले धनर्णे

न मूलं क्षयस्यास्ति तस्याकृतित्वात्॥ (बी. ग. २)

ख-(शून्यम् = zero) संबद्धा गणितपद्धतयः भास्कराचार्येणैव प्रतिपदिताः-कयाचित् संख्यया खस्य संकलनेन वा, तस्याः खस्य व्यवकलनेन वा संख्याया वृद्धिः ह्रासो वा न भवति। कस्याश्चित् संख्यायाः शून्येन गुणने वा, कयाचित् संख्यया शून्यस्य गुणने वा फलं शून्यमेव। कयाचित् संख्यया शून्यस्य भागहारे कृते शून्यतश्छेदः (quotient zero) लभ्यते। परं तु यदि कस्या अपि संख्यायाः शून्येन भागहारः क्रियते सः स्वहारः (Infinite) भवति। स्वहारात् कस्यापि व्यवकलने, संकलने वा स्वहारे कोऽपि विपरिणामः न भवति। पाटीगणिते (Arithmatic) निषिद्धोऽपि खहारोपयोगः बीजगणिते अङ्गीकृतः।

खयोगे वियोगे धनर्णं तथैव
च्युतं शून्यतस्तद्विपर्यासमेति।
वधादौ वियत्खस्य खं खेन घाते
खहारो भवेत् खेन भक्तश्च राशिः॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्मिन् विकारः खहारे न राशा-
वपि प्रविष्टेष्वपि निःसृतेषु।
बहुष्वपि स्याल्लयसृष्टिकालेऽ
नन्तेऽच्युते भूतगणेषु यद्वत्॥ (बी. ग. ३,४)

खहारात् कस्यापि व्यवकलने वा संकलने वा तस्मिन् (खहारे) कोऽपि विकारः न भवतीत्यत्रोदाहरणतया भास्कराचार्यः अनन्तम् अच्युतं प्रदर्शयति। सृष्टौ, लये च अनन्तात् अच्युतात् भूतगणस्य व्यवकलने वा संकलने वा यथा तस्मिन् न कोऽपि विकारः तद्वदेवेदमिति तस्याशयः। ब्रह्मप्रतिपादकेऽस्मिन् उपनिषद्वाक्ये गणितशास्त्ररहस्यं वर्तते इति वदन्ति शास्त्रज्ञाः-

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावाशिष्यते॥

शून्यस्य, बीजगणिते तस्योपयोगस्य च निरूपणं तत्प्रथमतया ब्रह्मगुप्तेन (६२८ A.D.) ब्राह्मस्फुटसिद्धान्ते कृतम्। प्रायः तदेव भास्कराचार्येणानुसृतम् इत्यभिप्रयन्ति विद्वांसः।

अव्यक्तसंख्यादीन् (unknown quantities) निर्देष्टुं (यथाद्यत्वे 'x' 'y' 'z' इत्यादीन्युपयुज्यन्ते तथा) यावत्-तावत्, कालक-नीलक, पीतक-लोहितक इत्यादिशब्दानां प्रयोगः क्रियते प्राचीनाचार्याक्तरीत्या इति भास्कराचार्येणोक्तम्।

यावत्तावत् कालको नीलकोऽन्यो
वर्णः पीतो लोहितश्चैतदाद्याः।
अव्यक्तानां कल्पिता मानसंज्ञा
स्तत्संख्यानं कर्तुमाचार्यवर्यैः। (बी. ग. ५)

एकम् अव्यक्तं समानजातीयकेन अव्यक्तेन संकलयितुं ततोऽवकलयितुं वा शक्यते। विभिन्नजातिकयोस्तथा कर्तुं न शक्यते। यथा - "यावत्-तावत्" इत्येतत्

Digitization by Arya Samaj Charitable Foundation, Chennai

अन्येन "यावत्-तावत्" इत्यनेन संकलयितुं शक्यते न पुनः-"कालक-नीलक" प्रभृतिभिः विजातीयैः। व्यवकलनेपीत्थमेव।

योगोऽन्तरं तेषु समानजात्यो
र्विभिन्नजात्योश्च पृथक् स्थितिश्च।
स्याद्रूपवर्णाभिहतौ तु वर्णौ
द्वित्र्यादिकानां समजातिकानाम्॥
वधे तु तद्वर्गघनादयः स्यु-
स्तद्भावितश्चासमजातिघाते ।
भागादिकं रूपवदेव शेषं
व्यक्ते यदुक्तं गणिते तदत्र॥ (बी. ग. ६-७)

यथा अद्योदाहरणेषु '२x' इत्येतत् '५x' इत्येनेन संकलय्य '७x' इति वक्तुं शक्यते, न तु '२x' इत्यस्य '५y' इत्यनेन संकलनं क्रियते,एवमेव व्यवकलनेपि ।

एवं भास्कराचार्येण बीजगणिताध्याये षड्विधाव्यक्त-(six unknown qualities) संबद्धाः करणीगतराशयः (surds), कुट्टकगणितम्, वर्गस्वरूपस्व-भावौ, चक्रवालं चेत्यादयः बहवो विषयाः प्रतिपादिताः। बीजगणितग्रन्थस्यास्य महत् प्राधान्यमङ्गीकुर्वन्ति विद्वांसः।

गणिताध्यायः - अतीव विस्तृतेऽस्मिन् गणिताध्याये ग्रहगणितम् अतीव स्पष्टतया विस्तरेण च प्रतिपादितम्।

गोलाध्यायः — अस्मिन्नध्याये १५ अध्यायाः सन्ति। मङ्गलाचरणानन्तरं ज्यौतिषिकेन ज्ञातव्याः विषयाः निरूपिताः। शुभाशुभनिर्णयेऽपि गणितस्य, गणित-ज्योतिषस्य च महती आवश्यकता अस्तीति प्रतिपादितम्।

द्वितीये गोलस्वरूपप्रश्नाध्याये दश श्लोकाः सन्ति। तेषु पठित्रा ग्रन्थनिर्मातारं प्रति कृताः प्रश्नाः उपनिबद्धाः। भुवनकोशाख्ये तृतीयाध्याये प्रपञ्चस्वरूपं वर्णितम्। भूमेः उपरि चन्द्र-बुध-शुक्र-रवि-मङ्गल-गुरुनामानः ग्रहाः, नक्षत्रमण्डलं च केन क्रमेण तिष्ठन्ति इत्येतत् वर्णितम्। भूमेः आधारः कोऽपि नास्ति। सा स्वशक्त्यैव तिष्ठति।

Digitization by Arya Samaj Charitable Foundation, Chennai

अस्यामेव मनुष्यासुरदेवदैत्यादिभरितः प्रपञ्चः तिष्ठति। भूमण्डलस्यास्य कश्चिदाधारभूतः अस्तीति वादं भास्कराचार्यः नाङ्गीकरोति। भूमेराधारतया यदि किंचिदङ्गीक्रियते तस्याप्याधारभूतेन केनचिद् भवितव्यम्। तथा चानन्ततादोषः। अतः स्वयैव शक्त्या भूमिः अस्मिन्ननन्ताकाशे तिष्ठतीत्युक्तिरेव साधीयसी। भूम्याम् आकर्षणशक्तिः अस्ति, अत एव आकाशे क्षिप्तं वस्तु स्वसमीपमाकर्षति इति **न्यूटनात्** बहुशताब्दीभ्यः पूर्वमेव भास्कराचार्येण प्रतिपादितम्। भूमिं परितः आकाशस्य स्थितिः तुल्यैव, अतः भूमेः अधश्च्युतिप्रश्न एव नास्ति।

भूमध्यरेखातः उज्जयिनीपर्यन्तं दूरं प्रमाय १६ संख्यया तस्या गुणने भूमेः परिधिः आयाति, यतः उज्जयिन्याः अक्षांशः सार्धद्वाविंशत्यंशाः। अर्थात् १/१६x३६० अंशाः।विषयमिमं प्रतिपाद्य भास्कराचार्यः लङ्का-यमकोटि-रोमक-पत्तन- सिद्धपुर-सुमेरु-बडबानलदीन् व्यवृणोत्। ततश्च भूगोलः कथं वा दृश्यते इति ४८ तमे श्लोके अकथयत्। भूमध्यरेखायां स्थितः पुरुषः क्षितिजे दक्षिणध्रुव-उत्तरध्रुवौ द्रष्टुं शक्नोति। तथा शिरसः उपरि आकाशः जलयन्त्रवत् भ्राम्यन् दृश्यते। आधुनिकशास्त्रानुसारेणापि इदं ध्रुवीक्रियते। ध्रुवस्य उन्नतांशानां स्थानस्याक्षांशानां च परस्परसंबन्धोऽपि निरूपितः। **लल्लाचार्यादीनां** मतं खण्डयित्वा भुवः परिधिं तस्या व्यासम्, भूपृष्ठक्षेत्रफलं च निर्दुष्टया रीत्या प्रतिपादयामास भास्कराचार्यः।

मध्यगतिवासनाख्यस्य चतुर्थाध्यायस्यापि विषयः सूर्यचन्द्रादि ग्रहाणां मध्यगतय एव। भूमेः उपरि सप्तवायुमण्डलानि एकस्योपरि एकम् इति रीत्या सन्ति। तान्येव च मेघग्रहादीनाम् अधारतया वर्तन्ते। सूर्यचन्द्रादिपिण्डाः (Bodies) वायुना चाल्यन्ते। परन्तु तेषामन्तर्भ्रमणान्यनुसृत्य तेषां गतिषु भेदाः दृश्यन्ते। भ्राम्यति कुलालचक्रे प्रतिलोमतया गच्छन्त्यपि पिपीलिका चक्रभ्रमणवेगेन अग्रत एव गच्छति। इयमेव रीतिः सूर्यादिग्रहाणाम् इत्यादयो विषयाः वर्णिताः। अध्यायस्य शिष्टे भागे सौरवर्ष-चन्द्रमास-अधिकमासादयः वर्णिताः। अत्र प्रतिपादिताः सौरवर्षादिसंबद्धाः विषयाः सौरसिद्धान्तस्थेभ्यः तत्र तत्र किंचिद् भिद्यन्ते।

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चमाध्याये त्रिकोणमितिसंबद्धानि कानिचित्सूत्राणि दत्तानि । सूर्यचन्द्रादिग्रहाणां स्फुटस्थितिं ज्ञातुं केचिदुपायाः षष्ठाध्याये निरूपिताः । यत्र सूर्यादिग्रहाणां कक्ष्या दृश्यते तस्य चित्रस्य छेद्यकमिति नाम्ना व्यवहारः कृतः भास्कराचार्येण । अस्य छेद्यकस्य निर्माणपद्धतिः अतीव विस्तरेण प्रतिपादिता । गोलकबन्धाधिकाराख्ये सप्तमे अध्याये प्राथमिकदशास्थानां विद्यार्थिनां बोधार्थं कस्यचन यन्त्रस्य प्रयोगः वर्णितः । अयनांशः, क्रान्तिः, शरः इत्यादयोऽपि विषयाः विशदीकृताः ।

त्रिप्रश्नवासनाख्ये अष्टमेऽध्याये सूर्योदयसमयाभिज्ञानपद्धतिः, कस्मिन् देशे दिनप्रमाणं कथं वा भवतीति विषयः, उत्तरध्रुवदक्षिणध्रुवसंबद्धाश्च विषयाः वर्णिताः । पितृदेवाः चन्द्रस्य उपरिभागे वसन्ति । चन्द्रः तेषां पादाधः स्थित इव भवति । अतः मानवानाम् अमावास्यायां, यदा चन्द्रः सूर्यस्याधः आगच्छति तदा ते (पितरः) सूर्यं स्वशिरसि पश्यन्ति । तदा तेषां मध्याह्नसमयः । पूर्णिमायां यदा सूर्यः चन्द्रादधः दृश्यते तदा तेषां निशीथः ।

विधूर्ध्वभागे पितरो वसन्तः
स्वाधः सुधादीधितिमामनन्ति ।
प्रश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे
दर्शे यतोऽस्माद्द्युदलं तदैषाम् ॥

भार्धान्तरत्वान्न विधोरधस्थं
तस्मान्निशीथः खलु पौर्णमास्याम् ।
कृष्णे रविः पक्षदलेऽभ्युदैति ।
शुक्लेऽस्तमेत्यर्थत एव सिद्धम् ॥ (गोल.१३,१४)

ग्रहणवासनाध्याये सूर्यचन्द्रोपरागावधिकृत्य सुविस्तृतो विमर्शःकृतः । चन्द्रः अल्पमेघशकलवत् यदा सूर्यम् आच्छादयति तदा सूर्यग्रहणं भवति ।

चन्द्रबिम्बः सर्वदापि खे पश्चिमत एवागत्य तमाच्छादयति । अतः सूर्यग्रहणस्पर्शः पश्चिमायां दिशि, मोक्षश्च पूर्वस्यां भवति । आच्छादकस्य चन्द्रबिम्बस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

आच्छाद्याद्रविबिम्बात् अल्पप्रमाणत्वात् केषु चिद्धेशेषु वसतां तदाच्छादनं न दृष्टि-गोचरं भवति ।

पश्चाद्भागाज्जलधरवदधः संस्थितोऽभ्येत्य चन्द्रो
भानो र्बिम्बं स्फुरदसितया छादयत्यात्ममूर्त्या ।
पश्चात् स्पर्शो हरिदिशि ततो मुक्तिरस्यात एव
कापि च्छन्नः क्वचिदपिहितो सैष कक्षान्तरत्वात् ॥

(गोल. २९.१)

भूमेः छाया चन्द्रग्रहणस्य कारणम् । पूर्वाभिमुखं गच्छन् चन्द्रः भूमेः छायायां प्रविशति । अतः चन्द्रगहणस्पर्शः पूर्वस्यामेव दिशि भवति, मोक्षश्च पश्चिमायाम् ।

पूर्वाभिमुखो गच्छन् कुच्छायान्तर्यतः शशी वहति ।
तेन प्राक् प्रग्रहणं पश्चान्मोक्षोऽस्य नो परतः ॥ (९-४)

यद्येवं सूर्यचन्द्रग्रहणयोः कारणं राहुः इति पुराणादिवचनानां का गतिः इत्या-शङ्क्य भास्कराचार्यः "नात्र विरोधः यतः शम्भोः लब्धवरप्रसादः राहुर्नाम तमोमयः असुरः तेषु उपरागसमयेषु चन्द्रं, भूच्छायां च आक्षिप्य तिष्ठति । अतः केवलं गोलविद्यामेव प्रमाणीकृत्य उपरागस्य राहोः न कोऽपि संबन्ध इत्युक्तिः न न्याय्या" इति वदति—

दिग्देशकालावरणादिभेदा
न्नाच्छादको राहुरिति ब्रुवन्ति ।
यन्मानिनः केवलगोलविद्या-
स्तत्संहितावेदपुराणबाह्यम् ॥

राहुः कुभामण्डलगः शशाङ्कं
शशाङ्कगश्छादयतीनबिम्बम् ।
तमोमयः शम्भुवरप्रसादात्-
सर्वागमानामविरुद्धमेतत् । (९.९,१०)

Digitization by Arya Samaj Charitable Foundation, Chennai

बृहत्संहितायां वराहमिहिरेणापि किंचिद् भेदेन एवमोवोक्तम्। "सूर्यचन्द्रोपरागसमयेषु कृतानां दानहोमादीनां फलस्य कश्चनांशः त्वया लप्स्यते" इति किल ब्रह्मणा राहवे वरो दत्तः। अत एव किलासौ तेषु समयेषु तत्र सन्निहितो भवति—

योऽसावसुरो राहुस्तस्य वरो ब्रह्मणायमाज्ञप्तः।
आप्यायनमुपरागे दत्तहुतांशेन ते भविता॥
तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहोः।
यामोत्तरा शशिगतिर्गणितेऽप्युपचर्यते तेन॥ (२.१४-१५)

शृङ्गोन्नतिवासनाख्ये चाध्याये चन्द्रकलानां दर्शने कारणं कथितम्। यन्त्राध्याये च कालमाने उपयुक्तनाम् ग्रहक्षेत्रादिज्ञानोपयुक्तानां च केषांचिद्यन्त्राणां वर्णनं कृतम्। अतिसूक्ष्माणां कालांशानां ज्ञानाय यन्त्राणां साहाय्यमनिवार्यमिति वदति भास्कराचार्यः।

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः क्वचित्॥

गोलो नाडीवलयं यष्टिः शङ्कुर्घटीचक्रम्।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम्॥ (१,३२.२)

प्रारम्भदशायां छात्राणां विविधग्रहस्थितिबोधनायोपयोज्यत्वेन गोलबन्धाधिकारे उक्तं गोलयन्त्रमेव इदं गोलयन्त्रम्। तस्यैव कालज्ञानोपयोगिता वर्णिता। अत एव श्लोकस्यास्य व्याख्याने **विश्वरूपः** "गोलबन्धोक्तविधिना सिद्धदृष्टान्तगोलस्यैव गोलयन्त्रत्वसिद्धेः तद्यन्त्रात् प्रथमोद्दिष्टात् कालज्ञानं गीत्यार्याभ्यामाह" इति अवदत्। कालमानोपयुक्तनामेव केषांचिद्यन्त्राणां ग्रहवेधेप्युपयोगः प्रदर्शितः।

घटाधोभागाकारं किंचित् ताम्रपात्रं निर्माय तस्याधः निश्चितप्रमाणं रन्ध्रं कृत्वा तत् पात्रं जलपूर्णे पात्रान्तरे बृहत्प्रमाणे विन्यसेत्। तस्मात् रन्ध्रात् अन्तः प्रविष्टजलस्य तस्य ताम्रपात्रस्य बृहत्पात्रगते जले निमज्जने यावान् कालः अपेक्षितः तदनुसारेण कालः मीयते, तत् घटिकायन्त्रम्। सूर्यस्योन्नतांशस्य ज्ञाने चक्रयन्त्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्योपयोगः। एवं यन्त्राणि विविधानि वर्णयित्वा भास्कराचार्यः "सर्वेभ्यः यन्त्रेभ्यः श्रेष्ठं धीयन्त्रमेव, हस्ते यष्टिं गृहीत्वा, तस्या मूले अग्रे च दृष्टिं स्थिरीकृत्य, यष्टिद्वारा च दृष्टिं प्रसार्य ग्रहवेधं कर्तुं यो जानाति सः आकाशगतानां भूमिगतानां, जलगतानां च वस्तूनां मानं स्पष्टतया द्रष्टुं पारयेत्" इति वदति—

अथ किमु पृथुतन्त्रैर्धीमतो भूरियन्त्रैः
स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टेः।
न तदविदितमानं वस्तु यद्दृश्यमानं
दिवि भुवि च जलस्थं प्रोच्यतेऽथ स्थलस्थम्॥ (३२.४०)

धीयन्त्रसाहय्येन कथं वा गणना कर्तव्या इति बोधयितुं कानिचिदुदाहरणानि दत्तानि भास्कराचार्येण — "कस्यचित् गृहस्य पश्चात् स्थितस्य वंशस्य अग्रभाग एव दृश्यते। अत्रस्थ एव तं पश्यन् त्वं किं तस्य वंशस्य प्रमाणम्, तव तस्य च मध्ये दूरं च वक्तुं शक्नोषि?" इति प्रश्नः।

ऊर्ध्वस्थस्य गृहादिभिर्व्यवहितस्याप्यग्रमात्रं सखे
वंशस्य प्रगुणस्य यस्य सुसमे देशे समालोक्यते।
अत्रैव त्वमवस्थितो यदि वदस्यस्यान्तरं चोच्छ्रयं
मन्ये यन्त्रविदां वरिष्ठपदवीं यातोऽसि धीयन्त्रवित्॥
(३२.४७)

प्रश्नस्यास्योत्तरं त्रिकोणमित्या कथं वा ज्ञातव्यमिति भास्कराचार्येणैव स्पष्टीकृतम्। एवं जले दृष्टस्य प्रतिबिम्बस्य साहाय्येनापि गणनं विशदीकृतम्।

एवं कतिचिद्यन्त्राणि वर्णयित्वा अन्ते यदि धीयन्त्रं सम्यगस्ति तदा अन्येषां यन्त्राणां नावश्यकता इत्युक्तेः इदं ज्ञायते यत् भास्कराचार्येण क्रियारूपेण (by adopting practical methods) ज्योतिःशास्त्राभिवृद्धये प्रयतनापेक्षया गणितभागस्यैव वर्णनप्रधानस्य (Theoritical) प्राधान्यं दत्तमिति ज्ञायते इति भारतसंबद्धं सर्वमपि यथाकथंचित् क्षुद्रतयैव दर्शयितुं प्रयतमानाः केचित्पाश्चात्याः मन्वते। "लोत्तनाभ्यां विहीनस्यः दर्पणः किं करिष्यति" इति न्यायेन सहजधी-

Digitization by Arya Samaj Charitable Foundation, Chennai

शक्तिहीनस्य यन्त्रैर्वा अन्यै र्वा साधनै: किं प्रयोजनमिति बुद्धेर्वैशिष्ट्यमेव प्रतिपिपादयिषत: महापण्डितस्य उक्ते: विपरीतानर्थान् आपादयन्ति एते पण्डितंमन्या: । प्रायो नैव ते जानन्ति व्याजस्तुतिव्याजनिन्दादीनलंकारान् ।

यन्त्राध्यायस्यान्ते भास्कराचार्येण त्रीणि स्वयंवहयन्त्राणि (स्वयमेव चलने शक्तानि यन्त्राणि) वर्णितानि । दारुणा चक्राणि निर्माय अक्षस्य समीपे च अरेषु पारदस्य निक्षेपात् यन्त्रं किल स्वयं भ्रमति, कानिचिच्च जलपूरणेन भ्रमन्ति ।

लघुदारुजसमचक्रे समसुषिराराः समान्तरा नेम्याम् ।
किंचिद्वक्रा योज्याः सुषिरस्याधः पृथक्तासाम् ।
रसपूर्णे तच्चक्रं दार्वायाधाराक्षस्थितं स्वयं भ्रमति ॥

(३२.५०)

तत: एकेन अध्यायेन ऋतव: वर्णिता: । प्रश्नाध्याये झटिति प्रश्नानाम् उत्तरदानस्योपाया: वर्णिता: । य: ज्यौतिषिक: अध्यायमिमं कण्ठस्थीकरोति स सभासु झटित्येव उत्तरं दातुं शक्नोति । अल्पज्ञानां ज्यौतिषिकमृगाणां च सिंह: भवति इति वदति भास्कराचार्य: ।

ज्योत्पत्तिनाम्नि अन्तिमाध्याये कोणानां ज्याभि: संबद्धानां गणितपद्धतीनां निरूपणं कृतम् । त्रिकोणमितिसंबद्धानां केषांचित् प्रश्नानामुत्तराण्यपि दत्तानि ।

भास्कराचार्येण रचित: अन्यो ग्रन्थ: **करणकुतूहलम्** । ग्रन्थेऽस्मिन् सुलभा: काश्चित् ग्रहगणनपद्धतय: प्रतिपादिता: । अद्यापि बहव: कर्तान्तिका: पञ्चाङ्गनिर्माणे अस्य ग्रन्थस्य साहाय्यमपेक्षन्ते ।

वराहमिहरवत्, भास्कराचार्येणाप्ययं शास्त्रग्रन्थ: रुचिरायां काव्यरीत्यां सुमधुरै: वृत्तै: रचित: । प्राय: पठितृषु उद्वेगजनकेषु शास्त्रग्रन्थेषु तत्र तत्र रमणीयाया: काव्यरीते: निवेशनेन-

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते ।
प्रथमालीढमधव: पिबन्ति कटु भेषजम् ॥

(भामह: काव्यालंकारे ५-३)

Digitization by Arya Samaj Charitable Foundation, Chennai

इति न्यायेन शास्त्रग्रहणोन्मुखा भवेयुरिति धिया तथा कुर्वन्ति शास्त्रकृतः। प्रायः अनेन दत्तेषूदाहरणान्तरेष्वपि काव्यसौन्दर्यं दृश्यते। पश्यत, शेषजात्युदाहरणश्लोकम्-

स्वार्धं प्रादात् प्रयागे नवदल
युगलं योऽवशेषाच्च काश्यां
शेषाङ्घ्रिः शुल्कहेतेः पथि दशमलवान्
षट् च शेषाद् गयायाम्।

शिष्टानिष्टत्रिषष्टिर्निजगृहमनयत्तीर्थपान्थः प्रयात-
स्तस्य द्रव्यप्रमाणं वद यदि भवतो शेषजातिः श्रुता स्यात्॥

(लीला. ५४)

कश्चित् तीर्थयात्रिकः स्वनीतस्य धनस्य अर्धं प्रयागे दानरूपेण अदात्। शिष्टस्य धनस्य नवमभागद्वयं (२/९) काश्यामदात्। शिष्टस्य चतुर्थभागः मार्गे शुल्कार्थं व्ययितः। शिष्टस्य द्वौ दशमभागौ (२/१०) गयायाम् अदात्। गृहं प्रतिनिवृत्तस्य तस्य सविधे ६३ निष्काः शिष्टाः आसन्। तेन कियद्धा धनं नीतम् इति प्रश्नः।

दृष्टमूलजातेः उदाहरणम्-

पार्थः कर्णवधाय मार्गणगणं क्रुद्धो रणे सन्दधे
तस्यार्धेन निवार्य तच्छरगणं मूलैश्चतुर्भिर्हयान्।
शल्यं षड्भिरथेषुभिः त्रिभिरपि च्छत्रं ध्वजं कार्मुकं
चिच्छेदास्य शिरः शरेण कति ते यानर्जुनः सन्दधे।

(लीला. ७६)

कर्णं हन्तुं पार्थः बाणान् प्रायोजयत्। तेषां बाणानामर्धेन कर्णस्य बाणान् न्यवर्तयत्। चतुर्भिः मूलैः (with four times the square root) अश्वान् षड्भिः बाणैः शल्यं च प्रहृत्य त्रिभिः च्छत्रध्वजचापान् खण्डयामास। एकेन कर्णस्य शिरः चिच्छेत। आहत्य अर्जुनेन कति बाणाः प्रयुक्ताः इति प्रश्नः।

Digitization by Arya Samaj Charitable Foundation, Chennai

जात्यत्र्यश्रस्य (Right angle triangle) उदाहरणं यथा—

अस्ति स्तम्भतले बिलं तदुपरि क्रीडाशिखण्डी स्थितः
स्तम्भो नन्दकरोच्छ्रितस्त्रिगुणितस्तम्भप्रमाणान्तरे।

दृष्ट्वाहिं बिलमापतन्तमपतत्तिर्यक् स तस्योपरि
क्षिप्रं ब्रूहि तयोर्बिलात् कतिमिते साम्येन गत्योर्युतिः।

(लीला. १५२)

कस्यचित् स्तम्भस्य मूले बिलमस्ति। स्तम्भाग्रे मयूरः अस्ति। स्तम्भस्य उच्छ्रायः नव हस्ताः। स्तम्भोच्छ्रायात् त्रिगुणे दूरे (२७हस्ताः) बिलं प्रति आगच्छन्तं सर्पं दृष्ट्वा मयूरः तिर्यक् तस्योपरि अपतत्। यदि सर्पमयूरयोः वेगः तुल्यः तौ बिलात् कियति दूरे मिलतः इति प्रश्नः।

जात्यत्र्यश्रस्यैव उदाहरणान्तरम्—

वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वाप्यां कपिः कोप्यगा-
दुड्डीयाथ परो द्रुतं श्रुतिपथात् प्रोड्डीय किंचिद्द्रुमात्।

जातैवं समता तयोर्युतिरपि प्रोड्डीयमानं कियत्
विद्वन् वेत्सि परिश्रमोऽस्ति गणिते क्षिप्रं तदाचक्ष्व मे॥

(लीला. १५७)

शतहस्तोच्छ्राये वृक्षाग्रे द्वौ वानरौ उपविष्टौ। तयोः एकः कोटिमार्गेणावतीर्य ततः द्विशतहस्तदूरस्थितं सरः भुजामार्गेण प्राप। द्वितीयः वानरः किंचिदूर्ध्वमुड्डीय, समोर्ध्वमानेन गत्वा ततः कर्णमार्गेण उड्डयमानः सरः प्राप। तयोः वेगः सम एव। विद्वन्! यदि त्वया गणिते सम्यक् परिश्रमः कृतः तस्य उत्प्लवनस्य प्रमाणं (उड्डीयमानम्) कियत् इति वद इति प्रश्नः।

कालिदासस्य मन्दाक्रान्तां स्मारयत् अपरं जात्यत्र्यश्रोदाहरणम्—

च ञत्क्रौञ्चाकुलितसलिले क्वापि दृष्टे तटाके
तोयादूर्ध्वं कमलकलिकाग्रं वितस्तिप्रमाणम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

मन्दं मन्दं चलितपवनेनाहतं हस्तयुग्मे।
तस्मिन्मग्नं गणक कथय क्षिप्रमम्भप्रमाणम्॥
(लीला. १५५)

कस्मिंश्चित् सरसि, क्वापि जलस्योपरि, वितस्ति प्रमाणं कमलकलिकाग्रं दृष्टम्। मन्देन पवनेन प्रहतं तत् हस्तद्वयदूरे सलिले मग्नम्, तस्य सलिलस्य प्रमाणं कियत् वद।

गोलाध्यायस्य ३२तमे अध्याये षट् ऋतून् वर्णयन् रमणीयान् एकादश श्लोकान् निबबन्ध। शास्त्रग्रन्थे ऋतुवर्णनस्य कोऽवसरः इत्याशङ्क्य-

ऋतुव्यावर्णनव्याजादीषदेषा प्रदर्शिता
कविता तद्विदां प्रीत्यै रसिकानां मनोहरा।

इति समाधत्ते। अन्ते च शब्दालंकारालंकृतैः त्रिभिः श्लोकैः कविताप्रीतिविहीनः कोऽपि भवेद्वा इति पृच्छति।

भास्कराचार्यस्य ग्रन्थानां महती प्रामाणिकता लोके। तदा प्रभृति अद्यावधि सर्वेषां पण्डितानां प्रशंसापात्रता लब्धा एतैर्ग्रन्थैः। सिद्धान्तशिरोमणेः यावत्यः व्याख्याः सन्ति तावत्यः न कस्यापि ज्योतिःशास्त्रग्रन्थस्य दृश्यन्ते। काश्चित् लीलावतीमात्रस्य, काश्चित् बीजगणितमात्रस्य अन्याश्च संपूर्णस्य ग्रन्थस्य व्याख्याः उपलभ्यन्ते। एतासामत्यधिकया संख्ययैव अनुमातुं शक्यते कियद्वास्य ग्रन्थस्य प्रामाण्यमिति। न केवलं भारते, पाश्चात्यदेशेष्वपि प्रचुरः प्रचारो लब्धोऽनेन ग्रन्थराजेन।

तत्प्रथमतया शून्यं (zero) प्रतिपाद्य गणितशास्त्रप्रक्रियायाम् मनसाप्यचिन्तितं लघूपायं प्रदर्श्य गणितशास्त्रे अत्युन्नतं स्थानं समुपार्जितं भारतीयैर्विद्वद्वरेण्यैः। बह्वीभ्यः शताब्दीभ्यः पूर्वमेव आधुनिकैरपि यन्त्रैर्ग्रेहीतुं दुःशकान् ग्रहगणनादीन् स्पष्टं ज्ञात्वा न केवलं प्रत्यक्षाणां, परोक्षाणामपि व्यक्ति-समाज-देशादिसम्बद्धानां फलानां निर्देशेन विश्वविख्याता भारतीयगणितविद्वांसः। विविधेषु शास्त्रेषु प्राचीनैराचार्यैः प्रदर्शितान् मार्गान् श्रद्धाविश्वासपूर्वकमनुशील्य नूतनान्

Digitization by Arya Samaj Charitable Foundation, Chennai

विषयान् अन्विष्य, तेषां प्राचीनानां च विषयाणां शास्त्रसंमतं, दुराग्रहदूरं समन्वयं संपाद्य भारतीयप्राचीनगौरवस्य पुनरुद्धरणं, प्राचीनाचार्याणां शास्त्रणां च वैशिष्ट्यस्य अविस्मरणं च एकैकस्यापि भारतीयस्य प्रधानं कर्तव्यम्, प्रथमो धर्मः ।

प्रथमभास्कराचार्यः लीलावत्यादिरचयितुः भास्कराचार्यात् पूर्वं अनेनैव नाम्ना कश्चित् पण्डितः आसीत् । अनेन **महाभास्करीयम्, लघुभास्करीयं** चेति ग्रन्थद्वयं व्यरचि । तयोः लिखितपुस्तकानि अनेकेषु ग्रन्थालयेषु उपलभ्यन्ते । अनेन **आर्यभटतन्त्रभाष्यम्** इति नाम्ना अन्योऽपि किल ग्रन्थः विरचितः । भाष्यमिदं प्रथमस्यार्यभटस्य आर्यभटीयस्य विस्तृता प्रामणिकी च व्याख्या । ग्रन्थोक्त्या ज्ञायते यदस्य रचनाकालः ६२९ तमो वर्ष इति । आर्यभटवत् अयं भास्कराचार्योऽपि किल अश्मकदेशीय एव । पञ्चदशशताब्दीं यावत् अस्य ग्रन्थाः प्रचारे आसन्निति ज्ञायते ।

यत्कृपालेशसंसर्गाद् ग्रन्थोऽयं रचितो मया ।
तस्यैव जानकीजानेः पदयोरयमर्प्यते ॥

देवतानुग्रहः पित्रोस्तपश्चाचार्यसत्कृपा ।
कर्तास्मद्ग्रन्थजातस्य करणं केवलं वयम् ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परामृष्टेषु ग्रन्थेषु प्रधानानां नामानि

१. पाणिनिः—अष्टाध्यायी

२. कणादः—वैशेषिकदर्शनम्

३. भास्कराचार्यः—लीलावती, विश्वेश्वरानन्द वैदिक शोधसंस्थान, होशियारपुर (१९७५)

४. भास्कराचार्यः—सिद्धान्तशिरोमणिः, ग्रहगणिताध्यायस्य तृतीयो भागः, बनारस हिन्दू विश्वविद्यालय, वाराणसी (१९६४)

५. भास्कराचार्यः—गोलाध्यायः—द्वितीयो भागः, आनन्दाश्रमप्रेस्, पूना (१९५२)

६. वराहमिहिरः—बृहज्जातकम्, वाविळळरामस्वामिशास्त्रि एंड सन्स, मद्रास (१९४९)

७. वराहमिहिरः—बृहत्संहिता, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी (१९६६)

८. आर्यभटः—आर्यभटीयम्, त्रिवेन्द्रम्

९. कौटिल्यः—अर्थशास्त्रम्, चौखम्बाविद्याभवन, वाराणसी (१९६२)

१०. युधिष्ठिरमीमांसकः—संस्कृत व्याकरण का इतिहास

११. शंकरबालकृष्णदीक्षित-भारतीयज्योतिष, पब्लिकेशन ब्यूरो, उ० प्र० सरकार, लखनऊ

Digitization by Arya Samaj Charitable Foundation, Chennai

१२. गोरथ प्रसाद—भारतीय ज्योतिष का इतिहास, पब्लिकेशन ब्यूरो, उ० प्र० सरकार, लखनऊ

१३. Vasudeva Saren Agrawal : India as known to Panini

१४. Satya Prakash : Founders of Sciences in Ancient India, The Research Institute of Ancient Scientific Studies, New Delhi (1965)

१५. Jaggi, O.P. : Scientists of Ancient India, Atmaram and Sons, Delhi.

१६. Krishna Rao, M.V. : Studies in Kautilya, Munshi Ram Manoharlal, Delhi (1958)

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai



Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai